आषाढमासः
वर्षम् –६८
नवमोऽङ्कः
विक्रमाब्दः २०७४
युगाब्दः ५११९
५ जुलाई २०१७

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–





गणेशो यन्मुखाच्छ्रुत्वा लिलेख जयभारतम्।
व्यासस्य तस्य पूजार्थं मान्यते गुरुपूर्णिमा।।

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | गुरुपूर्णिमा एकं प्रसिद्धं भारतीयं पर्व | कोमल टांक | ५ |
| ५ | धनलता | ऋषिराजजानी | ६ |
| ६ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः | ८ |
| ७ | गुर्जर-काव्यपृषताः | अनुवादकः-हर्षदेवमाधवः | ९ |
| ८ | पुरस्कारा घोषिताः | डॉ. प्रवीण पंड्या | १० |
| ९ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | ११ |
| १० | संस्कृत समाचारः | घनश्याम हरदेनियाँ | १२ |
| ११ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १३ |
| १२ | रसस्य काव्यशास्त्रीयं विवेचनं भरतोक्तं रससूत्रञ्च | प्रमोदकुमार शर्मा | १४ |
| १३ | करोतु सदैव ''भगवत्साधनाम्'' | डॉ. राकेश शास्त्री | १५ |
| १४ | राष्ट्रस्य अभ्युत्थाने नारीणां योगदानम् | आरती मीणा | १६ |
| १५ | मारवाड़ प्रदेशस्य संस्कृतैतिहासिक-महाकाव्यानि | प्रोफेसर रामदत्त शर्मा डी. लिट्. | २१ |
| १६ | नरपतिजयचर्यास्वरोदये चन्द्रशृङ्गोन्नतिचक्रम् | स्वातिः शर्मा | २३ |
| १७ | भाग्यरेखया संपत्ति-विचारः | शम्भूसिंह बारेठः | २५ |
| १८ | गोवंशस्य वैशिष्ट्यम् | डा. सुनीता शर्मा ( प्रथम ) | २७ |
| १९ | दत्तन्न राष्ट्राय किम् | डॉ. रामनारायण झा | २९ |
| २० | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| २१ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | ३१ |
| २२ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**

स्व. परमाचार्यः

श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ

स्व. उमाकान्तकेशवआप्टे

( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

स्वामी विश्वेशतीर्थः

स्वामी सत्यमित्रानन्दगिरिः

स्वामी रामभद्राचार्यः

आचार्यः अविचलदासः

स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्यारेमोहनशर्मा

प्रबन्धसम्पादकः

सुदामाशर्मा

सहसम्पादकौ

प्रो. सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता

ओ.पी. गोयल



पृष्ठसंयोजनम्

श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्

rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

श्रीमद्भागवतं पुराणममलं व्यासोऽसृजद्भक्तितः,
ग्रन्थे यत्र रसेश्वरस्य लिखिताः रासस्य लीलाः शुभाः।
मोहिन्याः शिवमोहकं सुचरितं योऽवर्णयल्लीलया,
व्यासो यत्र समसृजत् सुललितं श्रीकृष्णलीलामृतम्।।

## मासावतरणम्

आषाढे प्रथमे दिने जलमुचां दृष्ट्वा घटामुत्सुकाः,
धान्यार्थं धरणीधराः वसुमतीं कर्षन्ति सीरैर्भृशम्।
अम्भोभारवहा नता जलधराः सिञ्चन्ति भूमिं सदा,
वर्षर्तौ ललनास्तदा घनघटां दृष्ट्वा भवन्त्युत्सुकाः।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

आषाढमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2074
जुलाई, 2017
अङ्कः - 9
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# सम्बन्धमाभाषणपूर्वमाहुः

...✍ पं. प्यारेमोहनशर्मा

भारतस्य सभ्यतायाः संस्कृतेश्च विश्वस्मिन् विश्वे विशिष्टं स्थानं विद्यते। अत्र तु कालिदासशब्देषु आभाषणमात्रेण परस्परं सम्बन्धा अजायन्त। वयं भारतीयसंस्कृतेः गुणानुवर्णने सदैव गौरवमनुभवामः। परिवारसदस्येषु सुमधुरा प्रगाढाः सम्बन्धाश्च भारते एव दरीदृश्यन्ते स्म। विभिन्नलोकगीतेषु प्रगाढतायाः माधुर्यस्य च वर्णनं सहस्रशो वर्षेभ्यः विधीयते। राजस्थानस्य लोकगीतेषु विशिष्टं माधुर्यं विद्यते।

एतादृशे समाजे एषु दिनेषु या घटनाः घटन्ति ताभ्यः सम्बन्धानां मूलमेव समूलमुन्मीलितम्। जयपुरे गतदिवसेषु ये द्वे घटने घटिते तयोरत्रोल्लेखो विधीयते। जाटसमाजस्य पितरौ केरलमूलनिवासिनः स्वजामातुः यया रीत्या जघन्यां हत्यामकारयतां तेन तु अस्माकं सभ्यता एव विलोपिता। सम्प्रत्यपि किं वयं सभ्याः? किमस्माकं समाजः सभ्यः?

प्रातरेव चौधरी दम्पती एकं हन्तारं (सूटरम्) नीत्वा स्वपुत्र्याः श्वसुरालयम् अगच्छताम्। जामातारम् अमितनायरं प्रसुप्तम् उत्थाप्य बहिरावाहयताम्। यथैव स बहिरागच्छत् (सूटरः) हन्तृपुरुषः सर्वेषां सम्मुखे गोलिकाभिः तं जघान। इत्थं या नवमासपर्यन्तं स्वोदरेऽपालयत् ततश्च बाल्यावस्थायां लालनपालन-मकरोत् सैव माता स्वसुतायाः सौभाग्यमच्छिनत्। सुतायाः केवलमेकः अपराधोऽविद्यत यत् सा स्वजातिं (जाटजातिं) विहाय जात्यन्तरेण युवकेन सह प्रेमविवाहमकरोत्। विवाहानन्तरं षड्वर्षाणि व्यतीतानि। घटनादिवसे च माता षाण्मासिकं गर्भं स्वोदरे स्थापिता अविद्यत। समाचाराः कथयन्ति यत् अमितनायरो मिलनसारः प्रसन्नचित्तः सर्वेषां प्रियो युवकोऽविद्यत।

कथं कापि माता स्वकीयासत्यप्रतिष्ठामादाय स्वसुतां विधवां कर्तुं शक्नोति न ज्ञातुं शक्नुमः। अनया घटनया को लाभः संजातः? चौधरी दम्पती आत्मानं रक्षितुम् इतस्ततो धावतः गुप्तरूपेण चात्मानं रक्षतः। परन्तु शीघ्रमेव तौ निगडितौ भविष्यतः शेषजीवनं च कारागृहे व्यत्येष्यतः। स्वसुतायाः शत्रुस्वरूपौ तौ सुतामपि न द्रक्ष्यतः। अमितनायरस्य मातुः वृद्धावस्थाया अवलम्बनं विनाशितम्। अत्रोल्लेखनीयो विद्यते चौधरीपरिवारः स्व-सुतां बी.एस.सी.एल.एल.बी. पर्यन्तमपाठयत्। स्व-प्रसन्नताया निधानं क्षणमात्रेण व्यलोपयत्।

अस्याः घटनायाः अपरे दिने एव एका अन्या हृदयविदारिका घटना संजाता। अस्यां घटनायाम् अन्यः एकः शिक्षितो जनः रात्रावेव मातुः पत्न्याश्च वधमकरोत्। कारणञ्च केवलमिदं यत् कन्यया साधारणशिक्षितया सह तस्य विवाहो मात्रा विहितः। कथं स जन्मदात्री-ममारयत् किमिति तस्य हस्तौ नैव कम्पितौ ?

उपरि वर्णिते द्वेऽपि घटने आदिवासिक्षेत्रे नैव जाते अपितु राजस्थानस्य राजधान्यां जयपुरे अभवताम्। सैषा घटना द्योतयति यद्वयमधुनापि ऊनविंशतिशताब्द्यां जीवामः अस्मिन् समये जातिधर्मप्रान्तानां देशानामपि भित्तिं त्रोटयित्वा युवकाः युवत्यश्च विवाहबन्धने प्रेम्णि च बद्धाः जायन्ते। एतादृशे समये जात्यादिमादाय जामातुः हत्या सर्वेषां कृते लज्जास्पदं विद्यते। सम्प्रति युवकाः सहपाठिभिः सह मिलन्ति अतः परस्परं मित्रतां कुर्वन्ति। प्रेम कुर्वन्ति विवाहं सम्पादयन्ति।

सैषा घटना तु प्रदर्शयति यत् शिक्षयापि दौरात्म्यं नावरुद्धम्। शिक्षिता जना अपि अशिक्षिता एव। सम्प्रति अपि जाति-पंचायत, खापपंचायतसंस्थानाभिः लोकानां व्यक्तिगतजीवनसम्बन्धिनिर्णया विधीयन्ते ये च स्वीकुर्वन्ति ते प्राणदण्डं भञ्जन्ति।

एषा संवैधानिकसमाजनिर्णयस्य (चुनौती) अस्वीकृतिर्विद्यते। विडम्बना त्वेषा विद्यते यदेतादृशीं हत्याम् ''आनर कीलिंग'' नाम प्रदीयते। कस्यापि निरागसो

हत्यां प्रतिष्ठया, कथं सम्बद्धां कर्तुं शक्नुमो वयम्।

मातुः पत्याश्च हत्यापि प्रेम्णः स्थाने घृणाधारित-सम्बन्धानेव द्योतयति। किं जीवनप्रदातृमातुः जीवनसंगिन्याश्च हननात् पूर्वं क्षणमात्रमपि हन्तुर्मनसि सम्बन्धानां पवित्रतायाः विचारो नैवागतः? किं पत्न्याः शिक्षायां न्यूनता तस्याः मृत्योः कारणं भवितुं शक्नोति ?

एतेषां प्रश्ननानामुत्तरं केवलं संस्कारविहीनशिक्षायाम् असहिष्णुतायामेव मिलति। केभ्यश्चित् वर्षेभ्यः पूर्वं संयुक्तपरिवारेषु (दादा-दादी-नाना-नानी-मामा-मामी-चाचा-चाची) पितामहः पितामही मातामहो मातामही मातुलो मातुलानी पितृव्यः पितृव्या च सर्वे सहोपविश्य सम्बन्धानां मधुरं रसमास्वादयन्ति स्म-अस्माकं सामाजिकाः। अधुना तु पितरावपि स्वां समुन्नतिं विधातुं शिशुभिः बालकैः सह निवासेच्छां न कुरुतः तर्हि तेषु संस्काराः जीवनमूल्यं च को विकासयिष्यति ?

शिक्षाव्यवस्थायां सुधारस्यावश्यकता विद्यते। शिक्षा-व्यवस्था एतादृशी भवेत् यस्यां प्रेम्णः प्रस्फुटनं स्यात्। घृणायाः असहिष्णुतायाश्च लेशमात्रमपि स्थानं न भवेत्। अस्माकं समाचारमाध्यमानि दूरदर्शनादीन्यपि महत्वपूर्णं योगदानं कर्तुं शक्नुवन्ति। अत एव कालिदासेनोक्तं ''सम्बन्धमाभाषणपूर्वमाहुः'' यदा आभाषणेन सम्बन्धः सञ्जातः तदा सम्बन्धिनां प्रणयं प्रेमापि रक्षणीयमेव।

# गुरुपूर्णिमा एकं प्रसिद्धं भारतीयं पर्व

❑ **कोमल टांक**

गुरुपूर्णिमा एकं प्रसिद्धं भारतीयं पर्व अस्ति। एतत् पर्व हिन्दवो बौद्धाश्च पूर्ण हर्षोल्लासेन सह मानयन्ति। एतत् पर्व हिन्दू कैलेंडरानुसारम् ''आषाढ़ मासस्य पूर्णिमायाम्'' आचर्यते। अस्मात् दिनान् चतुर्मास-पर्यन्तं परिवाज्रक साधु-सन्ताः एकस्मिन्नेव स्थाने न्युष्य ज्ञान-गंगां प्रवाहयन्ति। गुरुपूर्णिमा, गुरुं प्रति श्रद्धायाः समर्पणस्य च पर्वास्ति। एतत् पर्व, गुरोः सम्मानस्य नमनस्य च पर्वास्ति।

इयम् मान्यता अस्ति यत्....... अस्मिन् दिने गुरु पूजनं कृतं चेत् गुरोः दीक्षायाः सम्पूर्ण-फलम् तेषां शिष्येभ्यः प्राप्तं भवति। यथा-सूर्यस्य तापेन तप्त-भूमौ वर्षया शीतलता तथा च फसलानाम् उत्पादनाय शक्तिः प्राप्ता भवति तथा हि गुरोः चरणयोः उपस्थिताः साधका ज्ञानं शान्तिं, भक्तिं व प्राप्नुवन्ति।

एष दिवसः महाभारतस्य रचनाकारस्य व्यासस्य जन्मदिवसः अपि अस्ति। द्वीपे अस्य जन्म अभवत् इत्यतः ''कृष्ण द्वैपायनः'' इत्यपि एतस्य नाम। एतस्य पिता पराशर मुनिः माता च सत्यवती तथा च पितामहः प्रसिद्धः वशिष्ठ मुनिः आसीत्। एषः स्वपितुः ज्ञानस्य, मातुः व्यावहारिकतायाश्च साक्षात् मूर्तिः आसीत्। एषः संस्कृतस्य प्रकांड विद्वान् आसीत्। एषः जनानां स्मरणशक्तेः क्षीणतां दृष्ट्वा वेदानाम् ऋग्वेद, यजुर्वेदः, सामवेदः, अर्थवेदः च इति विभाजनम् अकरोत्।

वेदस्य विस्तारः एतेन सम्पादितः इति कारणेन एषः ''वेदव्यासः'' इति नाम्ना प्रसिद्धः जातः। तथाच एष ''आदिगुरुः'' अपि कथ्यते। तेषां सम्माने गुरुपूर्णिमा ''व्यास पूर्णिमा'' अपि कथ्यते। भक्ति कालस्य संत ''घीसादासस्य'' जन्म अपि अस्मिन् दिने अभवत्। सः कबीरदासस्य शिष्य आसीत्।

तथाच आधुनिक कालस्य संतः वृंदावन निवासी श्री हरिदासस्य वंशजः, परम पूज्यः, प्रातः स्मरणीय, परम श्रद्धेयः ''श्री मृदुल कृष्ण गोस्वामी'', तस्य जन्मदिवसः अपि अस्ति।

यः स्व शिष्यान् अंधकारात् प्रकाशं प्रति आनयति सः वास्तविकः गुरु भवति।

**''अज्ञान तिमिरांधस्यश्च ज्ञानांजन शलाकया**
**चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः''**

ईश्वरस्य साक्षात्कारः सद्गुरोः कृपया एव संभवति। गुरोः कृपां विना किञ्चिद् अपि संभवं नास्ति।

गुरुभक्त्या सम्बद्धाः बह्व्यः कथा सन्ति पुराणेषु। परंतु सर्वश्रेष्ठ कथा ''एकलव्यस्य'' कथा अस्ति।

**जयपुरम्**

लघुकथा :-

# धनलता ( Money Plant )

❑ ऋषिराजजानी

बहुभूमिकायाः (Apartment) सदनिकाया अङ्गणे टेक्षीयानं स्थगितम् अभवत्। टेक्षीयाने स्थितेन सतीशेन कथितं, ''पश्यतु अम्ब ! अस्माकं सदनिका आगता। विकास ! तत्र पश्य... दशम्यां भूमिकायां निहारिका मोनुः च तिष्ठतः। तौ अस्मभ्यं प्रतीक्षेते।'' सतीशः, विकासः माता च- सर्वे टेक्षीयानात् अवारोहन्। सतीशः टेक्षीयानस्य भाटकम् अददात्, विकासो मञ्जूषां बहिरानयत्। माता साश्चर्यं सर्वम् अवलोकयति स्म। कदाचित् सा पूर्वं महानगरस्य विश्वं चित्रपटं विहाय प्रत्यक्षं न दृष्टवती। सतीशस्य नगरे सेवायाः स्थानान्तरणात् पश्चात् प्रथमवारमेव माता कनिष्ठपुत्रेण विकासेन सह सतीशस्य गृहमागता। सतीशः पूर्वमपि मातरं स्वगृहमागन्तुम् आमन्त्रयत्। किन्तु गतवर्षे पितुः देहान्तात् क्षेत्रगृहयोः दायित्वं मातरि आगतम्। सतीशस्य अनुजः विकासः वाणिज्यमहाविद्यालयस्य द्वितीये वर्षे पठनेन सार्धं कृषिकार्ये साहाय्यमकरोत्। निहारिकासतीशौ द्वावपि सेवावृत्तिमकुरुताम्। अतः कार्यावकाशं विना ग्रामं गन्तुं न शक्यम्।

गृहप्रवेशादेव मोनुः पितामहीं पर्यचरत्। निहारिका तस्याः पादौ अस्पृशत् अपि च सा तस्याः स्वागतमकरोत् 'मातः! भवत्या यात्रा कीदृशी? विकासभ्रातः! अपि रेलयानं यथाकालमागतम् ? अपि यात्रा सुखदा जाता ? जलं पिबतु ! चायपानमपि सज्जीकृतमस्ति। युवां श्रान्तौ स्थः। स्नानगृहं गत्वा श्रममपनयताम्। मोनुपुत्रक! पितामहीं स्नानगृहं नय।' माता विकासेन सह एकमासं यावत् महानगरे स्थातुम् आगता। यद्यपि सा एतावन्तं दीर्घकालम् उषितुं नैच्छत् किन्तु विकासस्य ग्रीष्मावकाशः आसीत्। क्षेत्रस्य कृषिकार्यं रामजीपितृव्यः स्व्यकरोत्। अतः माता सतीशस्य निमन्त्रणस्य स्वीकारमकरोत्। द्विशयनकक्षमुख्यकक्ष- पाकशालायुक्तलघुके भाटकेन प्राप्ते गृहे कोऽपि अतिथिर्नागच्छति स्म। अतः निहारिका अतिथ्योः दीर्घनिवासेन मनसि चिन्तामकरोत्। किन्तु सतीशः तस्यै सान्त्वनमददात्, ''माता मोनुना सह निवत्स्यति च विकासः मुख्यकक्षे स्वप्स्यति।'' निहारिकाऽपि सतीशाय सर्वयोजनाविषये न्यवेदयदेव। यदि पितुः अनुपस्थितौ ग्रामस्थस्य गृहस्य विक्रयो भवेत्, तर्हि भृशं धनं हस्तगतं भवेत्। तेन धनेन नगरे स्वसदनिकायाः क्रयः शक्यो भवेत्। अन्यथा सेवावृत्याः क्षुद्रवेतनेन स्वगृहं स्वप्नवद् आसीत्। विकासोऽपि अत्रैव वृत्यर्थं नगर एव स्थायी भविष्यतीति निश्चितम्। किन्तु ग्रामगृहस्य विक्रयणं कर्तुं माता प्रसन्ना नासीत्। अतः निहारिका श्वश्रूं नगरे उषितुं प्रसन्नां कर्तुं व्यचारयत्।

कतिपयक्षणान्तरं निहारिका श्वश्रूं गृहं दर्शयितुम् अनयत्। 'पश्य अम्ब ! अयं मुख्यकक्षः। पुरतः सा पाकशाला। वामत आवयोः शयनकक्षः। इत आगच्छतु। अयं मोनुपुत्रकस्य कक्षः। भवत्या पौत्रेण सह स्थातव्यम्। अस्मिन कक्षे एका वातर्दिका (Balcony) अस्ति। वातर्दिकायां स्थित्वा भवती समग्रं नगरं द्रष्टुं शक्नोति पश्यतु.... वयं गगने स्थिता इव प्रतीयामहे। दशमभूमिकातः नगरदर्शनस्य अपूर्वः आनन्दः अनुभूयते।' निहारिका एतत् सर्वं सहर्षं न्यवेदयत्। सहसा माता काचकूपिकां व्यलोकयत्। काचकूपिकायाम् एका वल्ली प्ररूढा आसीत्। माता साश्चर्यं तां वल्लीं ध्यानपूर्वकं विलोकयन्ती स्थिता। न भूमिः, न मृत्तिका, न पुष्पधानी। तथापि इयं वल्ली कथं प्ररूढा ? काचकूपिकायां केवलं जलमस्ति। ग्रामे कदापि ईदृशी वल्ली न विलोकिता। निहारिका श्वश्र्वाः कौतूहलमवागच्छत्, ''अम्ब ! एषा धनलता वर्तते। इयं वल्ली गृहे धनमानयतीति मन्यते। यादृशी तस्याः वृद्धिः भवति तादृशी एव लक्ष्मीर्वधते।'' किन्तु माता धनं प्रति

उदासीना आसीत्। सा अपृच्छत्, 'किन्तु इयं वल्ली भूमिरहिता कथं प्ररोहति ? अस्यां काचकूपिकायां केवलं जलेन ?' भो अम्ब ! इयमेव अस्याः वल्याः वैशिष्ट्यम्। अस्यै भूम्या आवश्यकता नास्ति। अत्र दशम्यां भूमिकायां भूमितलं कथं लभ्यते? इमां वल्लीं जलपूर्णायां काचकूपिकायां स्थापयतु, सा स्वयमेव प्ररोक्ष्यति। क्षुप-वृक्ष-शस्यमये प्रदेशे निवसन्ती माता धनलतां स्वजनमिव अन्वभवत्।

अपरेद्युः प्रातःकाले निहारिकासतीशौ कार्यालयम् अगच्छताम्। मोनुपुत्रकस्य ग्रीष्मवकाश आसीत्। अतः माता मोनुना सह अक्रीडत्, तस्य विविधकथाभिः मनोरञ्जनमकरोत्। मध्याह्ने सा मोनुं स्वापयति स्म। विकासः बहुधा दिवसे दूरदर्शनमपश्यत् वा सतीशस्य बाइकयानेन विक्रयमहालय-सिनेमागृह-विपणि-इत्यादीनि स्थलानि अभ्रमत्। कृषिक्षेत्रे सदैव प्रवृत्ति-शिलायाः मातुः कृते 'अस्मिन् कारागृहसदृशे गृहे किं कर्तव्यम्?' इति महती चिन्ता आसीत्। मोनुं स्वापयित्वा सा पाकशालायाः लघुगुरुकार्याणि करोति स्म। पश्चात् सा वातर्दिकायाम् आसन्दीं नीत्वा उपाविशत्। अपि च मार्गवाहनव्यवहारं गच्छतः जनान् च पश्यति स्म। शेषकाले सा धनलतां पश्यन्ती तया सह वार्तालापं करोति स्म। चतुर्भित्तिमये कारागृहकल्पे निवासे मातुः जीवन्त्या धनलतया सख्यमभवत्। सायंकाले निहारिका कार्यालयात् आगत्य भोजनमपचत्। माता निहारिकायै पाकशालायां साहाय्यं करोति स्म। रात्रौ सतीशविकासयोः आगमनोत्तरं सर्वे भोजनमकुर्वन्। सर्वेऽपि प्रसन्ना आसन् किन्तु सतीशः मातुः नेत्रयोः पूर्वकालसदृशीं हर्षप्रभां नालोकयत्। सतीशः अवालोकयत् यद् धनलतायाः मातुः सहवासेन वृद्धिरभवत्। पूर्वकाले सतीशः धनलतायाः पर्णेभ्यः ''अधिकं धनमानय अधिकं धनमानय'' इति शब्दं श्रुतवान्। सम्भवतः निहारिकायाः संवर्धनवशात् धनलताऽपि निहारिकामन्वसरत्। किन्तु यदा प्रभृति माता गृहमागता तदाप्रभृति धनलताया धनपिपासा समाप्तिं गता। निहारिका द्वि-त्रिवारं सतीशाय मात्रा सह ग्रामस्थितं सदनं विक्रयार्थं प्रस्तावं कर्तुं न्यवेदयत्। किन्तु मात्रा सह अस्मिन् विषये संलापं कर्तुं सतीशस्य साहसं नासीत्।

कतिपयदिवसानन्तरं निहारिका सर्वैः सह महार्हम् आहारगृहं गन्तुमायोजयत्। विकासोऽपि नगरस्य आहारगृहं गन्तुमुत्सुक आसीत्। रात्रौ समग्रपरिवारः श्रेष्ठाहारगृहं गतः। परिवेषकः (Waiter) स्थालीषु विविधानि पक्वान्नानि पर्यवेषयत्। पायसं, पूरिकाः शाकाः, द्विदलानि, पर्पटं, भर्जकानि, तक्रं, मिष्टान्नानि शकलादैः सह बहुव्यञ्जनानि दृष्ट्वा माता आश्चर्यचकिता जाता। माता शनैः सतीशस्य कर्णे अवदत्, 'पुत्रक ! इदम् आहारगृहं महार्हं लभ्यते। कस्मात् त्वया इयान् रूप्यकव्ययः कृतः।' सतीशः केवलं मन्दमहसत्। भोजनवेलायां माता 'किं खाद्यं-किं न खाद्यम्' इति विचिन्तयन्ती स्थिता। शाकेन सह पूरिकाद्वयं खादित्वा माता अवदत्, 'अहो अहं तृप्ता जाता। अद्य मया बहु खादितम्।' किन्तु सतीशः अजानात् यत् अस्या रसवत्याः स्वादः मातुः पक्वान्नाद् न्यूनः आसीत्। अतः सा आहारगृहस्य भोजनं कृत्वा न तृप्ता जाता। तथापि माता अतिप्रसन्नतामदर्शयत्। तदा सतीशः चलदूरभाषस्य ध्वनिमशृणोत्। सतीशस्य मुखमुद्रा चिन्तापुरा जाता। ग्रामे सहसैव अतीव वृष्टिर्जाता। अतः क्षेत्रशस्यस्य महती हानिः सञ्जाता इति रामजीपितृव्यः दूरभाषेण न्यवदत्। यावत् शीघ्रं माता ग्रामं गच्छेत् तावत् श्रेयः भवेत्। सर्वे मातृदुःखं दृष्ट्वा शोकातुराः जाताः गृहं च प्रतिनिवृत्ताः। सतीशः श्वः मातरं ग्रामं प्रेषयितुं व्यवस्थामकरोत्।

गृहम् आगत्य निहारिका गृहस्य अवशिष्टकार्येषु व्यापृता जाता अपि च सतीशः स्वकक्षं गतः। तदानीमेव माता निभृतं समीपम् आगता, 'सतीश ! पुत्रक ! श्वः अहं ग्रामं गमिष्यामि किन्तु तत्पूर्वं किञ्चिद् वक्तुं कामये।'

'आगच्छतु अम्ब! अत्र उपविशतु। किं भवत्यै भोजनं रुचिकरमासीद् वा? किं भवती अत्र आनन्दं प्राप्तवती वा? सतीशः अपृच्छत्।' 'आहो प्रमत्तक! मया आनन्दातिशयः प्राप्तः। किन्तु अहं अन्यत् किञ्चिद् वक्तुमिच्छामि।' माता शनैरवदत्। सतीशः मौनं धृत्वा सावधानमश्रृणोत्। 'अस्मिन् नगरे जीवनं कष्टप्रदं महार्हं च वर्तते। गृहस्य भाटकं, मोनुपुत्रकस्य शिक्षाशुल्कं च नगरस्य महार्हता। त्वं किं धनाभावे पीडितोऽसि? मां सत्यं कथय। वयं ग्रामगृहं विक्रेष्यामः। आवाभ्यां कृते ग्रामे विशालं द्विभूमिकं भवनमनावश्यकम्। यदि विकासः वृत्तिं लप्स्यते तर्हि अहं तु भाटकगृहेऽपि निवत्स्यामि। मम कृते एका रोटिका आवश्यकी च स्वप्तुं लघ्वी भूमिः पर्याप्ता।' सतीशस्योपरि वज्रप्रहारो जातः। सः किञ्चिदपि वक्तुं न समर्थः यां कथां कथयितुं तस्य साहसं नासीत्, सा कथा मात्रा स्वयमेवोक्ता।

अपरेद्युः सायंकाले माता विकाससतीशाभ्यां सह ग्रामं गता। अतिवृष्टिवशात् शस्यस्य महती हानिः जाता। मातरं दृष्ट्वा रामजीपितृव्यः मेलितुम् आगतः। माता सविस्तरं सतीशस्य सदनिकां, नगरजीवनं, आहारगृहस्य महार्हं भोजनं, निहारिकायाः शुश्रूषा-एतत् सर्वं सगर्वम् उक्तवती। पुनरपि मातुः नेत्रयोर्हर्षद्युतिः आगता। यदा सा गृहं विक्रेतुं पुनरप्यवदत् तदा सतीशः प्रत्युत्तरत्, 'मातः! इदम् अस्माकं सर्वेषां गृहं वर्तते। अत्र गृहस्य भूमिरपि अस्माकं वर्तते। नगरस्य सदनिका न पृथिव्यां न गगने किन्तु अन्तराले वर्तते। तस्याः कृते अहं भूमिं त्यक्तुं न कामये।' रात्रौ स नगरं प्रति प्रस्थितवान्।

निहारिका सतीशस्य आगमनकाले एव अपृच्छत् 'किं भवान् मात्रा सह ग्रामसदनं विक्रेतुं चर्चामकरोत्? किं माता सदनं विक्रेतुमिच्छति वा?' सतीशो मूको भूत्वा कक्षमगच्छत्। धनलता तूष्णीमास्ते। निहारिका महानसम् अगच्छत्।

**8, राजतिलक बंगलोज, आबादनगरं, बसस्टोप के पास, बोपल, अहमदाबाद-380058**

---

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका,** पूर्व आचार्यः

**तप्यन्ते लोकतापेन साधवः प्रायशो जनाः।**
**परमाराधनं तद्धि पुरुषस्याखिलात्मनः।।**

साधु पुरुष प्रायः दूसरों के सन्ताप से सन्तप्त रहते हैं। यही उनके लिये परमात्मा की सर्वोच्च साधना है।

**- भागवतम्**

**शुभेन कर्मणा सौख्यं, दुःखं पापेन कर्मणा।**
**कृतं फलति सर्वत्र, नाकृतं भुज्यते क्वचित्।।**

**- वेदव्यासः**

शुभकर्म से सुख तथा पाप कर्म से दुःख प्राप्त होता है। सर्वत्र कर्म ही फल देता है, बिना किये हुए का फल भोगा नहीं जाता।

**अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्।।**
**जन्मान्तरकृतं हि कर्म फलमुपनयति इह जन्मनि।।**

**- बाणभट्टः**

अपने किये हुए शुभाशुभकर्मों का फल अवश्य भोगना पड़ता है। पूर्व जन्म में प्राणी जो कर्म करता है, वही इस जन्म में फल देता है।

**मन एव मनुष्याणां कारणं बन्ध मोक्षयोः।**
**मानसं तून्नतं यस्य भाग्यं तस्य समुन्नत्तम्।**

**-नीतिसार**

मनुष्य का मन ही उसके कर्म-बन्ध और मुक्ति का कारण होता है। जिसका मन राग-द्वेष से परे उज्ज्वल होता है, उसका भाग्य भी समुन्नत शील होता है। निर्मल मन ही तीर्थ है।

**आचार्यचरः,**
**महाराज-संस्कृत-महाविद्यालयः, जयपुरम्।**

( गुर्जर-भाषा-काव्य रचनानां संस्कृतेऽवतारणा )

गुर्जरमूलम्-शोभित देसाई

# गुर्जर-काव्यपृषताः

❑ अनुवादकः-हर्षदेवमाधवः

( 1 ) **सायंकालः**

अधिकविद्यार्जनार्थं
अधिकगुणार्जनक्षमः कुशलछात्रसदृशः
**सूर्यः** -
अपरिचितदेशं प्रेषणीयः।
अत एव
तत्र.... क्षितिजे, गमनचुम्बनं दातुं
गगनं नतम् ईषत्।

( 2 ) **सुगन्धः**

अपरिचितो लक्ष्येऽहं
शरीरे मे।
शरीरमस्ति मदीयं
किन्तु -
सुगन्धस्ते।

( 3 ) **संवादः**

शब्दरहितानि
ईदृशानि मसृणानि कतिपयानि वर्षाणि दत्तानि
न किञ्चित्
कथितं मया,
तथापि
तया सर्वमप्यवगतम्।

( 4 ) **केवलज्ञानम्**

गमनागमनमेव
मया
मताः सिद्धयः।
मया पथिकावासाय
गन्तव्यस्थानस्य
श्रेयो दत्तम्।।

( 5 ) **आरम्भः - अन्तः**

किमन्यत् कथयामि
त्वामहम् ?
मायावी सम्बन्ध आसीद्
असौ
तस्यान्तोऽपि
प्रारम्भेण
सहैव आनयत्।

( 6 ) **क्षितिजम्**

श्रान्तं
तथापि न पराजितं
सायंकालस्य क्षितिजम्...
समुद्र आकर्षति पादम्
तथापि
सूर्यस्तु तरत्येव...

( 7 ) **सत्यम्**

उचितानुचितानां
सर्वपरिमाणानां
तोलने गतम्
अवशिष्टमपि
सत्यं
भाषणे गतम्।

( 8 ) **कुत्र गतम् ?**

अहं पृच्छामि त्वां शिक्षक ! गतम्।
त्वदन्तर्वसन् शिशुकः कुत्र गतः ?।।

( 9 ) **क्षेत्रीयकार्यालयः**

रामकृष्णमिशनचिकित्सालयस्य
बहिः परिसरे... अर्धगोलाकृतिशिखरे (dome)
न कोऽपि पृच्छाकरः,
अतः चटकैः कृतः क्षेत्रीयकार्यालयः।
प्रातःकाले एकत्र जातेषु चटकेषु
विभिन्ना विभागा विभज्यन्ते
चटकनायक आदिशति
'गच्छन्तु' वो दत्तान् प्रदेशान्
दिवसं यावत्
कलकलनादानां 'चीं चीं' नादानां
सौरभं प्रसारयन्तु
अपि च शृण्वन्तु!

युष्माकं कृते पर्याप्ता धान्यकणा
परमात्मना प्रेषिता एव
अवगतं भवद्भिः?
चटकाः 'चीं चीं' नादैः 'आम्' 'वाढम्'
इति प्रत्युत्तरन्ति।
अपि च शनैः शनैः
मिष्टानन्दमयानां कूजितानां डयनम्
यथैव तैर्लब्धः
शेवधेस्सङ्केतः।
प्रातःकाले एकघण्टा-सार्धैकघण्टापर्यन्तम्
परिसरं परितः वृक्षेषु
चटकाः सन्ति रसमग्नाः 'चीं चीं इ ई...'
अं किञ्चिदन्यद् विचारयामि यद्
रामकृष्णमिशनचिकित्सालयस्य
अर्धगोलाकृतिशिखरं परितः
प्रतिवृक्षं यत्र सन्ति विहगाः
यत्रास्ति निबिडवृक्षदेशः
तत्र तत्रास्ति
'भूमेः स्वर्गप्रदेशः भूमेर्नाकभूमिः'

**किमस्ति सत्यम्?**

अस्ति
परस्परात्
३२-३५ माईलमितं दूरम्
तथापि
मार्गान्तयोः
कुक्कुरभषणशब्दः
समग्रपर्वतनीरवत्वं
स्फोटयतीव.....।
सत्यात्
न किञ्चिदपि खलु
जायत इति
विचारयामि
तत्क्षण एवं
निबिडप्रलम्बान्धकारं
भिनत्ति
एक आग्नेयकीटस्य स्फुलिङ्गः
किमिदं सत्यम्?
कुक्कुरः ? आग्नेयकीटः ?
(वा स्फुलिङ्गः ?)

**संकेतः- ८, राजतिलक बंग्लोज, आबादनगरम्, बस स्टोप समीपे, पेट्रोलपम्प निकटे, बोपल, अहमदाबाद-३८००५८**

**संस्कृत समाचारः**

# पुरस्कारा घोषिताः

❑ **डॉ. प्रवीण पंड्या**

साहित्याकादम्या अस्य वर्षस्य बालसाहित्यपुरस्कारस्य युवसाहित्यकारपुरस्कारस्य च घोषणा कृता। संस्कृते राजकुमारमिश्रस्य ''डयते कथमाकाशे'' इति बालकविता-संग्रहाय बालसाहित्यपुरस्कारस्य घोषणा जाता। बालसाहित्ये मिश्रस्य प्रथमेयं रचना पंचदशोत्तरद्विसहस्रतमवर्षे प्रकाशिता, यत्र त्रिंशत् कविताः सन्ति। युवकविः श्रीमिश्रः त्रयोदशोत्तरद्विसहस्रतमवर्षे साहित्याकादम्या युवपुरस्कारेणापि सम्मानितः।

संस्कृतस्य विविधपत्रिकासु राजकुमारमिश्रस्य विविधविधासु साहित्यरचनाः समये समये प्रकाशमायान्ति। सम्प्रति भवान् हरियाणासंस्कृतविद्यापीठे सहायकाचार्यत्वेन अध्यापयति।

साहित्याकादमीयुवपुरस्कारः हेमचन्द्रबेलवालाय, तस्य ''परिवर्तनकाव्यम्'' इति कवितासंग्रहाय समुद्घोषितः। अस्मिन् काव्यसंग्रहे परिवर्तनशतकं, नवसृष्टिशतकं, वानरराज्यशतकं चेति त्रीणि शतकानि सन्ति। युवकवेः बेलवालस्य रचनासु ग्रामजीवनं, परिवर्तितसमाजस्थितिश्च दृश्यते। साहित्याकादम्याः संस्कृतप्रतिभा-पत्रिकायां भवतः नैककाव्यानि विंशतिकासु प्रकाशितानि। संस्कृतसर्जनाख्यायाम् ई-पत्रिकायां दिल्लीसंस्कृताकादम्याः संस्कृतचन्द्रिका इति बालसाहित्यपत्रिकायां च बेलवालस्य विविधानि देशक्तिकाव्यानि बालगीतानि च काले काले प्रकाश्यन्ते। सम्प्रति अयम् उत्तराखण्डस्य पिथौरागढजनपदे एकस्मिन् राजकीयविद्यालये अध्यापयति।

**सांचोर**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# प्रो. सत्यव्रतशास्त्रिकृतित्वविमर्शग्रन्थः

भारतविश्रुता मूर्धन्याः संस्कृतविद्वांसो विविध-भाषाविचक्षणा, अगणितसम्मानैरलङ्करणैश्च सम्मानिताः, शतपुरस्कारपुरस्कृताः सपद्येव भारतशासनेन द्वितीयसंस्कृताऽऽयोगस्याध्यक्षपदेन विभूषितचरा दिल्लीमहानगरीमलङ्कुर्वाणाः, प्रो. सत्यव्रतशास्त्रिणः सुविदिता देशेऽस्मिन्। एतेषां बहवोऽभिनन्दनसमारोहा आयोजिताः, एतेषां कृतित्वमवलम्ब्य बहुभिः शोधप्रबन्धाः प्रणीताः, एतेषां लेखनोपरि बहवो ग्रन्थाः प्रकाशिताः, अनेक-त्रैतेषां व्यक्तित्वकृतित्वादिकमवलम्ब्य विद्वत्सङ्गोष्ठ्य आयोजिता इति सुप्रथितमेव।

25-26 नवम्बर 2011 दिवसयोः काश्मीरधरायां जम्मूविश्वविद्यालये 'शास्त्रिवर्याणां संस्कृताय योगदानम्' इति विषयमधिकृत्य राष्ट्रीयैका सङ्गोष्ठी समायोज्यत यस्यामेषां ग्रन्थानां विमर्शः एतेषां कृतित्वमवलम्ब्य विद्वच्चर्चाः समजनिषत, अनेकानि शोधपत्राणि प्रास्तूयन्त यानि संस्कृते हिन्द्यामाङ्गल-भाषायां च निबद्धान्यभूवन्। प्रमोदावहमिदं वृत्तं यत्तेषां शोधपत्राणां सङ्कलनं विधाय, अन्यामप्यावश्यकीं सामग्रीं समावेश्य ग्रन्थ एको जम्मूविश्वविद्यालयस्य संस्कृतविभागेन सपद्येव प्रकाशितो यस्याभिधानमस्ति "संस्कृतपुरुष सत्यव्रतशास्त्री"।

ग्रन्थेऽस्मिन् पूर्वं पञ्च संस्कृतपद्यबद्धास्तेषां स्तवनपराः प्रख्यातविदुषां काव्यरचना मुद्रिताः सन्ति, तदन्वेका हिन्दी काव्यरचना, तदनु आङ्गलभाषायां शास्त्रिवर्याणां विस्तृतो जीवनपरिचयः (प्रोफाइल) प्रस्तुतोऽस्ति। राजस्थानीयस्य गङ्गानगरवास्तव्यस्य राष्ट्रपतिसम्मानितस्य डॉ. सत्यव्रतवर्मणः सुविस्तृतः आङ्गलभाषाबद्धो निबन्धः शास्त्रिवर्याणां वैदुष्यस्य, काव्यरचनानां, गद्यरचनानां च सुबहुविस्तरेण सर्वाङ्गीणपरिचयं विमर्शं च प्रस्तुवन् सविशेष-मुल्लेखनीयः। इत्थं सप्त आङ्गलभाषाबद्धानि शोधपत्राणि, चतुर्दश हिन्दीभाषानिबद्धाः शोधनिबन्धाः, सप्त संस्कृते निबन्द्धा अनुसाधान निबन्धाः शास्त्रिवर्याणां ग्रन्थानां ससमीक्षणं परिचयं प्रस्तुवन्ति। सर्वे निबन्धा भारतविश्रुतानां विदुषां रचनाः। इत्थं हि सुविशालेऽस्मिन् शोधनिबन्ध-सङ्ग्रहग्रन्थे प्रो. शास्त्रिवर्याणां जीवनयात्राया विशेषतश्च वैविध्यमयस्य कृतित्वस्य (सर्वेषामपि विभिन्नभाषाबद्धानां तद्ग्रन्थानां) सर्वाङ्गीणं चित्रं द्रष्टुं शक्यते। अन्ते चित्रदीर्घाप्यस्ति। 29 सितम्बर 1930 ई. दिनाङ्के नगरे (यत् संप्रति पाकिस्तानदेशे समाविष्टमस्ति) विद्वन्मूर्धन्यानां प्रो. चारुदेवशास्त्रि-णामात्मजत्वेन प्रो. सत्यव्रतशास्त्रिणां जनिरभूत्। विभाजनानन्तरं भारते समागतैः प्रो. शास्त्रिभिरनवरतं सारस्वतसाधना समनुष्ठिता, विदेशेषु स्वकीयवैदुष्य-ध्वज उत्तोलितः, साम्प्रतमपि देहल्यामेते निरन्तरं साहित्यसर्जनरता इत्यस्माकं सौभाग्यम्। एतेषां शतायुष्ट्वं निरन्तर-सक्रियतां च कामयामहे चराचरनियन्तुः सकाशात्।

**संस्कृतपुरुष सत्यव्रतशास्त्री सम्पादकः- प्रो. केदारनाथशर्मा प्रकाशकः ईस्टर्न बुकलिंकर्स, 5825, न्यू चन्द्रावल, जवाहरनगर दिल्ली, पृ.सं. 320 मू. 800/-**

## संस्कृतरत्नाकरस्य पुनर्दर्शनम्

स्मरेयुरेव सप्तत्युत्तरायुः प्राप्ता विद्वांसो यद् विंश्याः शताब्द्या आरम्भे "विद्योदय" "संस्कृतचन्द्रिका" प्रभृतिभिः पत्रिकाभिः संस्कृतपत्रकारताया य इतिहास आरब्धस्तस्मिन् जयपुरात् प्रसरतः संस्कृतमासिकस्य "संस्कृतरत्नाकरस्य" प्रमुखा भूमिकाऽभूत् यः 1904 ई. वर्षात् 1949 ई वर्षं यावज्जयपुरात् प्राकाश्यत यश्चाऽखिलभारतीय-संस्कृतसाहित्यसम्मेलनस्य मुखपत्रत्वेन सभाजितोऽभूत्। स 1949 ई. वर्षानन्तरं वाराणसीं प्रस्थितः, तदनन्तरं कानपुरतः प्राकाश्यत, तदनु नई-दिल्लीत इत्यादिको विविधवर्णीयो-ऽस्येतिहासः प्रसिद्ध एव। मत्पित्रा कविशिरोमणि-देवर्षिभट्टश्रीमथुरानाथ शास्त्रिणा बहुकालं यावदस्य सम्पादनमक्रियतेति मन्मानसेऽस्य स्मृतयो निरन्तरम-क्षुण्णास्तिष्ठन्ति। समये समये पत्रस्यास्यान्तर्धानं भवति, तदनु पुनर्दर्शनमपि।

एवंविधमेव पुनर्दर्शनमस्य संस्कृतरत्नाकरस्य (वर्ष 3 अंक 12) मई 2017 मासे मया लब्धमिति

प्रमुदितमात्मानमनुभवामि। सुरुचिरमुद्रणे प्रकाशिते-ऽस्मिन्नङ्के हिन्द्यां संस्कृते-आङ्गलभाषायां च विविधविषयाणां शोधपूर्णविवचेनपरा: संग्रहणीया: लेखा: सन्ति प्रकाशिता:, सचित्रा विविधमनोरमरङ्ग- रञ्जिता, संस्कृत समाचारा अपि अनुवादाश्चापि। 28 पृष्ठात्मकेऽस्मिन्नङ्के प्रारम्भे पत्रकारिताविशेषज्ञस्य सुप्रथितस्य सम्पादकवर्यस्य डॉ. बलदेवानन्दसागरस्य लेख: संस्कृतपत्रकारिताया इतिहासं प्रस्तौति। वैदेशिकानां वेदाध्ययनस्य, आधुनिकसंस्कृतसाहित्य- परिदृश्यस्य, अथर्ववेदे समुपलभ्यमानानामायुर्वेद- विषयाणां च विवेचका लेखा हिन्द्यामाङ्गल्यां संस्कृते च मुद्रिता: सन्त्यत्र। विषयवैविध्यं शैलीवैविध्यं च प्रदर्शयत्यस्मिन्नङ्के मुखपृष्ठे एव ''वैविध्यसमावेशिनी संस्कृतपत्रकारिता'' इति विशालाक्षरबद्धं शीर्षक- मस्मादेव कारणान्मुद्रितं दृश्यते यदस्य विषयवैविध्यं, शैलीवैविध्यं चाऽप्यस्योल्लेखनीया विशेषा:।

सर्वासु पत्रिकासु सर्वेष्वङ्केषु प्रारम्भे तेषां लेखानां सूची, लेखकनामसहिता पृष्ठाङ्कसहिता च मुद्र्यते ये तस्मिन्नङ्के मुद्रिता: भवन्ति। सेयं हि सार्वत्रिकी सार्वदिकी च पद्धति:। अनया पाठकानां सौविध्यमपि भवति, इदमपि परिदृश्यते यत् कति लेखा: केषां लेखकानामत्र समाविष्टा:। एवंविधा विषयसूची नाऽस्मिन्नङ्के कुत्रापि परिदृश्यते। मन्ये सोऽयमपि वैविध्यस्य प्रमाणनं कुर्वन् कश्चिद् विशेष: स्यात्, किन्तु यदि तादृशी सूची मुद्रिताऽभविष्यत् तर्हि सुमहत् सौविध्यमभविष्यत् पाठकानाम्। द्वितीये पृष्ठे पञ्चषाणां लेखानां शीर्षकाण्यवश्यं सूचितानि न तु लेखकनामादिकम्। अस्तु, संस्कृतरत्नाकरस्य (अखिलभारतीयसंस्कृत-सम्मेलनेन प्रस्तुतस्य) पुनरवतरणमिदं महत: प्रमोदस्य विषय इति सम्पादकान् प्रकाशकांश्च साधुवादै: सभाजयाम:।

**संस्कृतरत्नाकर: (मासिक:) पदेन सम्पादक: रमाकान्त गोस्वामी कार्य.सम्पा.-आचार्य जीवनशर्मा, प्रका. अ.भा. संस्कृतसाहित्य-सम्मेलनं, संस्कृतभवनम् ए 10 कुतुब सांस्थानिक क्षेत्रम्, अरुणा आसफ अली मार्ग: नई दिल्ली 67 पृ.सं. 28 मू. 25/-.**

# संस्कृत समाचार:

❑ **घनश्याम हरदेनियाँ**
प्रान्तप्रचार प्रमुख:, जयपुरप्रान्त:




संस्कृत-भारतीजयपुरप्रान्तस्य ग्रीष्मकालीन आवासीय-शिविर-चालक शिक्षकप्रशिक्षणवर्गस्य भाषाबोधनवर्गस्य च आयोजनं सवाईमाधोपुरजनपदे बालिकाआदर्श उच्चमाध्यमिक-विद्यालय-मानटाउन इति स्थले दिनांक 19/05/2017 त: 30/05/2017 पर्यन्तं सञ्जातम्। अस्मिन् वर्गे पञ्चनवति प्रशिक्षणार्थिन: विंशति शिक्षका: प्रबंधकाश्च आसन्। वर्गे स्थानीया: संस्कृतानुरागिण: संस्कृतस्य विकासस्य भावना प्रकटितवन्त:। कार्यक्रमस्य समारोपकार्यक्रमे मुख्यातिथि: जिलाकलेक्टरमहोदय: आसीत्। तेन संस्कृतविकासाय परिश्रमकरणस्य आवश्यकता प्रकटिता। मुख्यवक्तृत्वेन संस्कृतभारत्या: क्षेत्रीय-संघटनमंत्री हुल्लासमहोदय: आसीत्। तेन संस्कृत-संभाषणमेकम् आन्दोलनरूपेण भवेत् इत्युक्तम्। अध्यक्षत्वेन स्थानीयनगरपरिषद् अध्यक्षा उपस्थिता आसीत्। तया संस्कारयुक्ता च भाषा भवेदिति विचारितम्। अन्ते भारतमातु: पुजनं सञ्जातम्। शिविर-मध्ये जनै: संस्कृतभाषाया: महत्त्वं प्रकटीकृतम्। कार्यक्रमे प्रान्ताध्यक्ष: श्रीहरिशंकर भारद्वाज:, प्रान्त-सम्पर्कप्रमुखादय: उपस्थिता: आसन्।




श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-

सप्तविंशः प्रसङ्गः

# लाहौरनगरे ( लवपुरे ) संघवृक्षारोपणम्

❑ वेणीमाधव गो. धर्माधिकारी

पंजाब (पञ्चनद) प्रान्तस्य सहप्रान्तप्रचारकाः ठा. रामसिंह महाभागाः वर्णयन्ति-देशविभाजनपूर्व-कालीना घटनास्ति। बाबा महोदयाः प्रतिवर्षमिव पञ्चनदप्रान्तस्य प्रवासार्थमागता आसन्। लवपुरीयसंघशाखया तेषां शुभागमनमेकेन महता सार्वजनिककार्यक्रमेण प्रारब्धम्। शारीरिककार्यक्रमप्रदर्शनानन्तरं बाबामहोदयानां भाषणं पूर्णैकहोरापर्य्यन्तं लवपुरीयस्वयंसैवकैः तेभ्यश्च कतिपय-गुणितैः सहस्रावधिभिर्जनैश्च श्रुतम्। तत्र कृष्णनगरस्य विशाले क्षेत्रे कार्यक्रमः संजातः। यत्र पश्चात् संघकार्यालयः स्थापितोऽभूत्। तस्मिन् समये आंग्लानां शासनत्वात्तेषां गुप्तचराणां संघकार्योपरि तीक्ष्णा दृष्टिरासीत्। तस्मिन् कार्यक्रमेपि गुप्तचरविभागस्य पञ्च षड्वा धूसरवर्णोच्चशिखा-युतोष्णीषधारिणः सम्प्राप्ता आसन्। तेषां कृते पृथगासन्द्यः स्थापिता आसन्। भाषणं लिखितुं पत्राणि लेखिन्यश्च तैः सहैवानीतानि। भाषणे प्रारब्धे एवं तैर्लेखनमपि प्रारब्धम् चत्वारि पञ्च वा क्षणानन्तरमेव लेखनमवरुद्धम्। ततस्तै रितस्ततोऽवलोकनमेव प्रारब्धम्। तैः पार्श्वेऽउपविष्टाजनाः पृष्टाः बाबामहोदयाः किं कथयन्ति परं तेऽपि न किंचिद् वक्तुमपारयन्। उत्थायेतस्तो गन्तुं तैः प्रयत्नः कृतः परं रक्षकस्वयंसेवकैस्ते तत्रैवोपा वेशिताः।

यदा कार्यक्रमः समाप्तः सर्वैश्च स्वस्वगृहे गमनं प्रारब्धम् तेष्वेकैकस्य स्वयंसेवकस्य समीपे गत्वा प्रश्नः कृतः बाबा महोदयैः स्वभाषणे किमुक्तम्? स्वयंसेवकोऽपि निपुण आसीत् स अवदत् पूर्णे समये उपविश्य भवद्भिर्भाषणं श्रुतम् अस्मान् किमिति पृच्छत ते अवदन् वयमन्तपर्य्यन्तमुपविष्टाः परमस्माकं बुद्धौ किमप्यायातम्। बाबामहोदयैः स्वभाषणे पूर्वमेकं बीजमुप्तम्, तदङ्कुरितं गुल्मरूपं जातम्, तस्य पालनं पौषणं कृत्वा वृक्षरूपं कृतम्। अनन्तरं तद् यद् विशालरूपमभवद् यदस्माकं राष्ट्रस्य कोटिशो जनाः तस्य छायायां विश्राममकुर्वन्। तेषां च समस्ताः आशाः आकाङ्क्षाः पूर्णाः अभवन्। इदमेवास्माकं बुद्धौ समायात्। परमाश्चर्यमिदमस्ति बाबामहोदयैर्वृक्षमिदं किमर्थं रोपितम्। अस्य कोऽभिप्रायः? अस्माभिः प्रख्यातानां महतां नेतृणां भाषणानि श्रुतानि परमेतादृशं भाषणं नैव श्रुतम्।

स्वयंसेवकोऽपि कुशल आसीत्। तेनोक्तं यद्भवतां बुद्धौ समायातं तदेवऽस्माभिरप्यवगतम्। अनन्तरमपि तैरितस्ततः प्रष्टुं प्रयतितं परं न कोऽपि लाभः समभवत्। बाबा महोदयैर्यत्किमपि वक्तव्यं तत्सर्वं स्वभाषणे कथितं स्वयंसेवकैश्चावगतमपि। परं गुप्तचरविभागैस्तैर्जनैः रिक्तहस्तैः रिक्तपत्रैरेव च विभागे गन्तव्यमभूत्।

### व्यक्तिपरीक्षणकुशलः स्वभावः

तेषां तेजस्वितायाः एकान्यापि घटनास्ति। तेषु दिवसेष्व-हममृतसरे संघप्रचारक आसम्। बाबामहोदयाः पञ्चनदप्रवासे आसन्। अमृतसरनगरेऽपि च तेषां कार्यक्रम आसीत्। स्वयंसेवकानां बौद्धिकवर्गानन्तरं कार्यकर्तृणांमधिवेशनानन्तरं च नगरस्य प्रतिष्ठितजनानामेकमधिवेशनं तत्कालीननगरसंघ-चालकानां स्व. पं. ज्ञानचन्द्रमहोदयानां गृहे आयोजितमासीत्। श्रीमतामाप्टेमहोदयानां परिचयः कारितः, अनन्तरं च स्वल्पाहारः समभवत्। तदनन्तरं प्रश्नोत्तराणां कार्यक्रमः समभवत्। एको महाशयः वारं वारमेकमेव प्रश्नं पृच्छतिस्म, सहैवेदमपि कथयतिस्म यद्भवतोच्यते तर्कनिकषे तत्सत्यमथापि समाधानं नास्ति। आप्टेमहोदयैः द्वि-त्रिवारमवबोधयितुं कृतः परं सर्वोऽपि विफलः। त्वरितमेव आप्टेमहोदयैरवगतम् जनोऽयं पूर्वाग्रही विचाराणामस्ति। केवलं तर्कार्थमेव तर्कं करोति। ते उच्चैरवदन् यदहं वदामि तत्सत्यमैतिहासिकप्रमाणः स्वपरिपुष्टमपि, तथाप्यहं जानामि भवन्तो नैव स्वीकरिष्यन्ति। ''यू विल नाट् बी कन्विन्स्ड बाइ आरग्यूमेण्ट्स बिकाज यू बिलीव इन आरग्यूमेन्ट्स बाइ बायोण्ट्स'' एतावदुक्तौ स सज्जनः अवदत्-अलं बाबामहोदय! अलम्, अधुना मया सर्वं ज्ञातम्। मनुष्यस्य परीक्षणेते निपुणाः तर्कं स जनः कम्यूनिष्टविचारसरणिं स्वीकुर्वन्नासीत्।

ब्रह्मपुरी, जयपुरम्

# रसस्य काव्यशास्त्रीयं विवेचनं भरतोक्तं रससूत्रञ्च

❑ प्रमोदकुमार शर्मा

काव्यशास्त्रस्येतिहासे रससिद्धान्तस्य प्रधानं प्रवर्तनं नाट्यशास्त्रे भरतमुनिना कृतम् उपलभ्यते। यद्यपि राजशेखरेण काव्यमीमांसाग्रन्थे लिखितं-

**''रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः।'' ( काव्यमीमांसा )**

तथापि नन्दिकेश्वरस्य न कोऽपि रसविषयको ग्रन्थो लभ्यते। वर्तमानसमये समुपलभ्यमाने भरतमुनि-कृतनाट्यशास्त्रे रूपकनिरूपणीयं रसनिरूपणीयञ्च सर्वं लभ्यते। तत्र द्वयोरपि विषययोर्भरतमुनिना विवेचनं कृतम्। अतो रससिद्धान्तस्य प्रथमः प्रवर्तको भरतमुनिरेव मान्यः।

रसस्वरूपं रसानुभूतिञ्च प्रथमं नाट्यशास्त्रस्य प्रणेता भरतमुनिः विवेचितवान्। नाट्यशास्त्रस्य षष्ठेऽध्याये रससूत्ररूपेणेदं विवेचनं प्रादुरभवत् उत्तरवर्तिनि युगे रससम्बन्धिनोऽन्येऽपि विचाराः विवेचना आलोचना वा प्रस्तुतीभूताः, भरतस्य रससूत्रमेव प्रमाणीकृत्य व्याख्याताः। भरतस्य रससूत्रं वर्तते-

**''विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पतिः।''**

विभावानुभावव्यभिचारिभावानां संयोगाद् रसस्य निष्पत्तिर्जायते। भरतोत्तरवर्त्तिनः आचार्याः रसनिष्पादने रससूत्रमिदमेवाऽऽधारीकृत्य स्वसिद्धान्तान् प्रतिपादित-वन्तः। अस्मिन् विषये मम्मटाचार्येण प्रोक्तम्-

**कारणान्यथ कार्याणि सहकारीणि यानि च।**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।।**
**विभावानुभावास्तत्ः कथ्यन्ते व्यभिचारिणः।**
**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः।।**

लोके रत्यादिस्थायिभावानां यानि कारणानि कार्याणि सहकारीणि च वर्तन्ते, यथा नायकनायिकादय आलम्बनकारणानि सन्ति, चन्द्रोदयचन्द्रास्तुवसन्तोद्या-नादीन्युद्दीपनकारणानि वर्तन्ते, भुजाक्षेपरोमाञ्चकटाक्षा-दीनि कार्याणि विद्यन्ते चिन्ताहर्षोद्वेगादयो भावाः सहकारीणि भवन्ति। तेषु एव काव्येषु नाट्येषु वा निबध्यमाना विभावा-अनुभावा-व्यभिचारिभावाश्च कथ्यन्ते। तैः विभावानुभावव्यभिचारिभावैः अभिव्यक्तः स्थायिभाव एव रस इति पदेन अभिधीयते। विश्वनाथस्यापि साहित्यदर्पणे रसनिष्पादनम् एवंविधं वर्तते -

**विभावेनाऽनुभावेन व्यक्तः सञ्चारिणा तथा।**
**रसतामेति रत्यादिः स्थायिभावः सचेतसाम्।।**

**( साहित्यदर्पणः )**

विभावेनाऽनुभावेन सञ्चारिभावेन चाभिव्यज्यमानो रत्यादिभावः स्थायिभावः सहृदयहृदयेषु रसभावम् आप्नोति।

**भरतकृतं रससूत्रम्-**

**''विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।''**

नाट्यशास्त्रे उल्लिखितम् इदं भरतसूत्रमतीव सरलं सुस्पष्टं च वर्तते परं व्याख्याकाराणां विविधविध-व्याख्याभिरतिक्लिष्टतां प्राप्तम्। परवर्तिव्याख्याकाराचार्यैः इदं सूत्रं चतुर्भिः सिद्धान्तैः विकसितम्- उत्पत्तिवादः, अनुमितिवादः, भुक्तिवादः अभिव्यक्तिवादश्च सत।

आचार्यभट्टलोल्लटेन संयोगशब्दस्य अर्थत्रयं कृतं -

(1) विभावानां संयोगेन उत्पाद्य-उत्पादकसम्बन्धः, (2) अनुभावानां संयोगेन गम्य-गामक भावसंबंधः, (3) व्यभिचारिभावानाञ्च संयोगेन पोष्य-पोषकभाव-संबंधः। एतेषाम् अर्थत्रयाणां संदर्भे 'निष्पत्ति' शब्दस्यापि अर्थत्रयं कृतं - (1) स्थायिभावेन सह विभावानां संयोगे उत्पाद्य-उत्पादकभावसम्बन्धेन रसस्य निष्पत्तिः अर्थात् 'उत्पत्तिः' भवति। (2) अनुभावानां संयोगे गम्य-गामक भावासंबंधेन रसस्य निष्पत्तिः अर्थात् प्रतीतिः भवति। (3) व्यभिचारिभावानाञ्च संयोगे पोष्य-पोषकभाव-संबंधेन रसस्य निष्पत्तिः अर्थात 'पुष्टिः' जायते। एतत् सर्वम् अधोलिखितसरणिमाध्यमेन स्पष्टं क्रियते-

| संयोगः | भाव-संबंधः | रस-निष्पत्तेः अर्थः |
|---|---|---|
| स्थायिभावः विभावश्च | उत्पाद्य-उत्पादकः | रसस्य उत्पत्तिः। |
| स्थायिभावः अनुभावश्च | गम्य-गमकः | रसस्य प्रतीतिः। |
| स्थायिभावः व्यभिचारिभावश्च | पोष्य-पोषकः | रसस्य पुष्टिः। |

**शोधच्छात्रः**
**राष्ट्रिय-संस्कृत-संस्थानं (जयपुर-परिसरः),**
**जयपुरम् (राज.)**

संभाषणशैली-

# करोतु सदैव ''भगवत्साधनाम्''

❑ डॉ. राकेश शास्त्री

रे मन! यदि वांछसि सुखी भवितुं
चिन्तयतु सर्वेषां हितं नैव मलिनम्।
भवसागरं तर्तुं खलु वांछसि चेत्
करोतु किल प्रतिक्षणं भगवत्साधनाम्।।1।।
'शुक्तौ रजत इव' सर्वे भोगाः
क्षरन्त्येते खलु तव जीवनम्।
आवहति नित्यत्वं सदैव भगवत्तत्वं
तत्प्राप्त्यर्थं करोतु भगवत्साधनाम्।।2।।
संसारोऽयं भवसागर-''पंकिल''
भोगास्सर्वे खलु निकृष्टाः
यदि वांछस्येतान् त्वं वै तर्तुं
करोतु खलु सदैव भगवत्साधनाम्।।3।।
एते पुत्राः किल पत्नी ममैव
तुंगं भवनं महत्शोभनम्।
सर्वे नन्वेते तव बन्धनं
खण्डनाय कुरु वै भगवत्साधनाम्।।4।।
यतोहि एतेषु सर्वेषु लिप्तो भूत्वा
करिष्यसि त्वं जीवनं नष्टम्।
अत एव कथयामि सज्जो भवतु
करोतु प्रतिक्षणं भगवत्साधनाम्।।5।।
भगवत्स्मरणं सदैव करोतु दिवारात्रौ तमेव चिन्तयतु।
नैवास्माद् किमपि श्रेष्ठं करोतु सदैव भगवत्साधनाम्।।6।।
चिन्तयतु जन्मैतत् कथं संजातं?
भक्षणाय मलविसर्जनाय खलु।
तत्तु पशवोऽपि कुर्वन्ति जगति
भवितुं भिन्नं कुरु त्वं भगवत्साधनाम्।।7।।
एतत् मम खलु पुष्टशरीरं
एतानि सुस्वादुव्यंजनानि।
चिन्तनमेतेषां नैवोचितं।
मुक्त्यर्थं पुनः जन्मनि खलु
स्थिरचित्तो भूत्वा करोतु भगवत्साधनाम्।।8।।
''अहं किलास्मि संसारे सर्वं''
यद् वांछामि तदैव करिष्यामि।
चिन्तनमेतत् नैव समुचितं
करोतु एकाग्रो भूत्वा प्रभु-साधनाम्।।9।।
संसारे भोगाः लिम्पन्ति मनुष्यं
त्वं नैव करोत्वेतेषां ध्यानम्।
अतः कथयामि चेतयतु क्षिप्रं
करोतु त्वं मनसा वै साधनाम्।।10।।

1-जे-38, हाउसिंग बोर्ड कॉलोनी
बांसवाड़ा (राज.)

# राष्ट्रस्य अभ्युत्थाने नारीणां योगदानम्

❑ आरती मीणा

अखिलविश्वे भारतीयसभ्यता संस्कृतिश्च गौरवयुक्ता समृद्धतमा चास्ति। यतोहि इतिहासे प्रायशः अन्यदेशानां सभ्यता संस्कृतिश्च लुप्ता जाता परन्तु भारतीया सभ्यता संस्कृतिश्च वैकिदकालात् अद्यावधि यावत् अक्षुण्णा विद्यते। अत एव भारतीय-संस्कृतिरनुसरणीया वर्तते। कस्यापि राष्ट्रस्य विकासे उन्नतौ वा नारीणां योगदानं महत्त्वपूर्णं भवति। अस्माकं राष्ट्रस्य पुनरुत्थाने अपि सर्वदैव नारी स्वभूमिकां प्रकटयति। भारते नारीणां स्थानं गरिमामयमासीत्, सा जननी-भगिनी-करुणामयी श्रद्धायाः प्रतिमूर्तिरस्ति। नारीं विना मानवजीवनमपूर्णं वर्तते। नर-नार्योः पूरकता तयोः सम्पूर्णतां प्रदर्शयति। प्रत्यक्षाप्रत्यक्षरूपेण मानवः सर्वदा नार्या प्रभावितः भवति, सृष्टेः कल्पनायां नार्यपेक्षिता विद्यते, सैव शक्ति-प्रेरणा-जीवनस्यावश्यक-पूर्तिः। गृहस्थ-परिवारयोः केन्द्रबिन्दोः आधारशिला समाजस्य च महत्त्वपूर्णमङ्गं नारी एव आसीत्।

'नारी' शब्दस्य व्युत्पत्तिः प्रकारद्वयेन भवति (क) नृ+अज्+ङीप्। (ख) नर+ङीप् 1

पतञ्जलिना द्वयं स्वीकृत्य विलिखितम्-

''नुर्धर्म्यान्नारी'' अथवा ''नरस्यापि नारी''।2

इयं नारी स्त्री-वामा-महिला-भार्या-वनिता इत्यादिरूपेणापि विख्याता जाता। 'स्त्यै इत्यनेन स्त्री', स्त्यै नाम लज्जा, लज्जायुक्ता या भवति सा स्त्री। वमति स्नेहम् इति वामा (वम्+अण्+टाप्)। मह्यते पूज्यते इति महिला (मह्+इलच्+ आ)। वने या निवसति सा 'वनिता' इत्यर्थः।

स्त्रीविषयेऽमरकोषेऽपि लिखितम् -

**स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः।**
**प्रतीपदर्शिनी वामा वनिता महिला तथा।। 3**

एतदतिरिच्य रसमञ्जर्यां नार्याः चतुर्णां भेदानां वर्णनं सलक्षणं कृतम्-

1. पद्मिनी-

**भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा,**
**अविरलकुचयुग्मा दीर्घकेशी कृशाङ्गी।**
**मृदुवचनसुशीला नृत्यगीतानुरक्ता,**
**सकलतनुसुपेशा पद्मिनी पद्मगन्धा।।**

2. चित्रिणी -

**भवति रतिरसज्ञा नातिदीर्घा न खर्वा,**
**तिलकुसुमसुनासा स्निग्धदेहोत्पलाक्षी।**
**कटिबधनकुचाढ्या सुन्दरी सा सुशीला।।**
**सकलगुणविचित्रा चित्रिणी चित्रवक्त्रा।।**

3. शंखिनी -

**दीर्घा सुदीर्घनयना वरसुन्दरी या,**
**कामोपभोगरसिका गुणशीलयुक्ता।**
**रेखात्रयेण च विभूषितकण्ठदेशा,**
**सम्भोगकेलिरसिका किल शंखिनी स्यात्।।**

4. हस्तिनी -

**स्थूलाधरा स्थूलनितम्बभागा,**
**स्थूलाङ्गुली स्थूलकुचा सुशीला।**
**कामोत्सुका गाढरतिप्रिया च,**
**नितम्बखर्वा खलु हस्तिनी सा।।**

उपर्युक्तचतुर्णामुल्लेखः एकस्मिन् पद्ये प्राप्यते -

**पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी।**
**शंखिनी क्षारगन्धा च मदगन्धा च हस्तिनी।।4**

सृष्टेः विकासक्रमे स्त्रियः महत्त्वपूर्णाः सम्पूर्ण-रिक्तस्थानस्य सम्पूर्तिः नारीभिरेव मन्यते।

**'अयमाकाशः स्त्रिया पूर्यते'। 5**

ऋग्वेदोऽपि प्रतिपादयति –

**'स्त्री हि ब्रह्मा बभूविथ'। 6**

अथर्ववेदे कथितं यदेषा नारी शुद्धा पवित्रा, पूजनीया चास्ति। यथा–

**''शुद्धाः पूता योषितो यज्ञिया**
**इमा आपन्नरन्मवसर्पन्तु शुभ्राः।**
**अदुः प्रज्ञां बहुलान् पशून् नः**
**पक्तौदनस्य सुकृतामेतु लोकम्''।। 7**

भारतीयसंस्कृतौ माता एव ईश्वरः। यथा उपनिषत्सु –

**''मातृदेवो भव''। 8**

महाभारतस्य शान्तिपर्वण्यपि स्त्रीविषये उक्तमस्ति, यथा–

**धर्मार्थकामकालेषु, भार्या पुंसः सहायिनी।**
**विदेशगमने चास्य, सैव विश्वासकारिका।। 9**
**भार्या हि परमो ह्यर्थः, पुरुषस्येह पठ्यते।**
**असहायस्य लोकेऽस्मिँल्लोकयात्रा सहायिनी।। 10**
**तथा रोगाभिभूतस्य, नित्यं कृच्छ्रगतस्य च।**
**नास्ति भार्यासमं किंचिन्नरस्यार्तस्य भेषजम्।। 11**
**नास्ति भार्यासमो बन्धुर्नास्ति भार्यासमा गतिः।**
**नास्ति भार्यासमो लोके, सहायो धर्मसंग्रहे।। 12**

एवं प्रतिभाति यत् नारी स्वप्रतिभया न केवलं काव्य-साहित्य-इतिहासादिषु प्रवाहमाना अपितु धर्म-समाज-राजनीत्यादौ अप्यस्याः प्रभावः परिलक्ष्यते। प्राचीनकाले नार्यः गृहे एव तिष्ठन्ति स्म, गृहकार्याणि एव कुर्वन्ति स्म किन्त्विदानीं समाजेषु, सभासु, विद्यामन्दिरेष्वपि तासामुत्तरदायित्वं साफल्येन दरीदृश्यते। प्रत्येकस्मिन् क्षेत्रे सामाजिकं स्यात्, राजनीतिकं स्यात् धार्मिकं स्यात् साहित्यिकं स्यात्, वैज्ञानिकं स्यात्, सैन्यसंचालनस्य च क्षेत्रं स्यात् सर्वत्र नारीणां भूमिका महत्वञ्च दृश्यते। अतः तस्यैव विवरणं प्रस्तूयते क्रमशः–

**शिक्षाक्षेत्रे** – शिक्षाक्षेत्रे नार्याः कीदृशी भूमिका वर्तते, विषयेऽस्मिन् उच्यते यत् नारी एव प्रथमो गुरुः, न केवलं स्वशिशोः अपितु समाजस्य शिशूनां शिक्षायाः दायित्वमपि नायर्या क्रियते। समाजेऽस्माकं प्रारम्भिकस्तरेऽधिकांशतः नारीणां नियुक्तिरेव विद्यते, यतोहि बाल्यकाले यदा शिशुः प्रथमवारं गृहात् बहिः विद्यालयं प्रति गच्छति तदानुशासनसहनशीलताऽनयोः समन्वयेन शिक्षिकारूपे नारी एव लघुशिशोः सुरक्षां मार्गदर्शनञ्च करोति। यदि नारी स्वयं सुसंस्कृता सम्पन्ना च भविष्यति तर्हि तया बालकस्य मनस्याजीवनपर्यन्त-विद्यमानसंस्काराणां निर्माणं कर्तुं शक्यते।

प्राचीनकाले शिक्षिकाणां कृते 'आचार्या' इति शब्दस्य प्रयोगो भवति स्म। स्वयं महर्षिपाणिनिना नार्याः शिक्षितजनानां च कृते 'उद्यमेधा' शब्दस्य प्रयोगः कृतः, शबर्यपि मातंगमुनेराश्रमस्य प्रमुखाऽऽचार्या आसीत्। एवं शिक्षिकारूपे बाल्यकालादारभ्य किशोरावस्थापर्यन्तं बालको मातुः समीपे एव भवति। कथ्यते महाभारते–

**'नास्ति मातृसमो गुरुः'। 13**

एवमेव बालकानां मनसि संस्कारान् प्रति रुचिजागरणमपि तदैव भवति। देशेऽस्माकं शिक्षा प्राचीनकालतः एव विद्यमाना, ऋग्वेदाऽनुशीलनेन ज्ञायते तस्मिन् समये नारीभिः शिक्षायां स्वतन्त्ररूपेण वेदाध्ययनं कविताः च कृताः। ऋग्वेदे नैकानि सूक्तानि सन्ति येषु नार्यः मन्त्रद्रष्ट्र्यः आसन् यथा सूर्यानाम्नी ऋषिका ऋग्वेदस्य दशमण्डलस्य 85 सूक्तस्य द्रष्ट्री, इन्द्राण्यपि दशममण्डलस्य 145 सूक्तस्य द्रष्ट्री, ब्रह्मवादिनी घोषा दशममण्डलस्य 39 व 40 इत्यनयोः सूक्तस्य द्रष्ट्री आसीत्। एता विहाय विश्पला, अपाला, लोपामुद्रा, विश्ववारा, सिकता, सर्पराज्ञी, ममता, यमी, रोमशा, जुहू, निवावारी, उर्वशी, श्रद्धादिभिः नारीभिः ज्ञानक्षेत्रे उच्चस्थानं लब्धम्।

**सामाजिकक्षेत्रे**– सामाजिकक्षेत्रेऽपि 'नारीणां' योगदानं समाजे संस्थासु विद्यालयेषु चिकित्सालयेषु मन्दिरेषु च सर्वत्र सामाजिकमनुष्यरूपेण नारीभिः कार्यं

कृतम्। सहैव समाजे व्रत-त्यौहारादिकर्माणि महिलानां सहभागिता अपेक्षिता भवति, उपर्युक्तकर्माणि नारीभिरेव सम्पन्नानि क्रियन्ते।

प्राचीनसमये बौद्धधर्मस्य प्रचारकरूपेण संघमित्रा-थेरिमहोदयया लंका गता। तत्र गत्वाऽनया भिक्षुणीसंघस्य स्थापना कृता, येन माध्यमेन बौद्धसाहित्यस्य बहव्यः रचनाः आगताः या 'थेरीगाथा' इति नाम्ना प्रसिद्धा वर्तते। अस्मिन् बुद्धोपदेशैः प्रभाविताः संन्यासिमहिलानां नामोल्लेखो वर्तते। वर्तमानसमयेऽपि चंदाकोचर-मल्लिकाश्रीनिवासन्-अरुन्धतीभट्टाचार्य-शिखाशर्मा आदिभिः महिलाभिः प्रसिद्धिमवाप्य राष्ट्रस्य प्रगतौ योगदानं दत्तम्।

**धार्मिकक्षेत्रे**- धार्मिकक्षेत्रे पुरुषस्य कल्पना नारीं विना न कर्तुं शक्यते। लौकिकजीवनेऽद्यापि यज्ञानुष्ठानेषु धार्मिककृत्येषु च पत्युः वामतः नारी एव उपविष्टा विद्यते। यतोहि नार्याः निर्माणमात्मतत्त्वस्य वामांशेनाभवत्। कारणादस्मात् पत्नी वामांगना अर्धांगिनी कथिता वर्तते। तुलसीदासेनास्मिनाधारे शिवस्य कृते ''**वामांगे च विभाति भूधरसुता**'' रामस्य च कृते ''**सीता-समारोपितवामभागं**'' लिखितम्।

महाभारतेऽभिमन्युना स्वमातुः सुभद्रायाः गर्भा-वस्थायामेवार्जुनोक्तचक्रव्यूहभेदनस्य रहस्यं ज्ञातं, मातुः कारणादेव। एवमेव परशुरामे पितृपक्षेण ब्राह्मणः मातृपक्षेण च क्षत्रियभूतत्वात् तस्य व्यक्तित्त्वे द्वौ गुणौ सम्मिलितौ स्तः। कुन्त्यपि स्वाध्यात्मिकज्ञानेन देवताभ्यः पुत्रान् याचितवती। महात्मगान्धिनः माता निरक्षराऽसीत् किन्तु संस्कारयुक्ताऽऽदर्शवादिनी चासीत् अतः गान्धेरन्तःकरणे सर्वे संस्काराः जन्मजाताः एव अभवन्। इत्थं गर्भकाले एव नारीणां संस्काराणां प्रभावः सन्ताने तीव्ररूपेण विद्यते ये संस्काराः जीवनपर्यन्तम् आधारशिला भवन्ति तेषां मनसि।

शंकराचार्यो विवेकानन्दश्च प्राचीनकाले धार्मिक-समाजसुधारकौ आस्ताम्। तयोः माताऽपि धार्मिकाऽऽसीत्। यस्मात् कारणादस्माकं देशे ईदृशाः महान्तः विद्वांसः उत्पन्नाः।

सांख्यप्रवर्तकस्य कपिलमुनेः माताऽध्यात्मज्ञान-मवाप्य मोक्षपथेऽग्रसराऽभवत्। याज्ञवल्क्यस्य भार्या मैत्रेयी जिज्ञासायुक्ता तत्त्वज्ञानेच्छायुक्ता चास्ति। अतो याज्ञवल्क्यः तस्यै अध्यात्मविद्यां दत्तवान् यदि सा तत्त्वज्ञानप्राप्तेः पात्रं न भवेत् तर्हि याज्ञवल्क्येन कदापि सा न शिक्षिता। महाभारत-रामायणयोरपि सुलभा-आत्रेयी द्वे अभविष्यत्। महिलेऽध्यात्मसाधनायां विख्याते जाते। रामचरितमानसे शबर्याः निष्कपटभक्तेः ज्वलन्तोदाहरणं वर्तते तया निष्कपटभावेन भगवान् रामः प्राप्तः।

कृष्णभक्त्या सुसम्पन्ना 'मीराबाई' इत्यस्या अध्यात्मसाधना तु सर्वोच्चपराकाष्ठायाम् आसीत्। मीरया नैकानि भक्तिपदानि विरचितानि यानि पदानि हिन्दीसाहित्यस्या-मूल्यनिधिः।

एवमाध्यात्मिकक्षेत्रे नार्यः माता-भगिनी-पुत्री-पत्न्यादिभिः पुरुषस्य पथ-प्रदर्शिका जाता यथा-प्राचीनकाले द्रौपदी-कुन्ती-विदुला-गान्धारी-जीजाबाई आदयः। वर्तमानसमयेऽपि बहव्यः महिलाः धार्मिक-क्षेत्रेऽध्ययनरताः सन्ति।

**राजनैतिकक्षेत्रे** - भारतीयनार्याः कठोरतम, परिस्थितिषु यादृशं शौर्यं प्रतिभाति तादृशं शौर्यं इतिहासे लुप्तं न जातम्। पति-पुत्रयोरभावे आपत्काले नार्या यादृशी शासनव्यवस्था संचालिता कृता तेन प्रतीयते यत् कमनीयतत्त्वस्य विरुद्धं नार्यां पुरुषवत् पौरुषमपि विद्यते, तस्मात् कारणात् सा वीराङ्गना कथ्यते।

राजनीतौ प्राचीनकाले देवासुरसंग्रामे दशरथेन कैकेय्या साकं विजयः प्राप्तः, रघुवंशेऽपि कालिदासः राजनीतौ नार्याः वर्णनं प्रस्तौति। नवदशसर्गे रघुवंशीयराज्ञः अग्निवर्णस्य विलासिनो मृत्योरनन्तरम् अन्ते गर्भावस्थायां तस्य भार्या शासनसंचालनं स्वीकृत्य राजसिंहासनं लब्धवती।

संस्कृतनाटकैरपि सिद्ध्यति यत् याः स्त्रियः सैनिकशिक्षा-धनुर्विद्यायां पारङ्गताः आसन् ता एव तस्मिन् समये राज्ञामङ्गरक्षिकाः स्वीकृताः आसन्। एतदतिरिच्य बहव्यः स्त्रियः आसन् याभिः शासन-सैन्यसंचालनं तु न कृतं तथापि ताः राजनैतिक-शासकीयज्ञाने कुशाग्रबुद्धियुक्ताः आसन् तासां मतं सर्वदा राज्ञः कृते अपेक्षितं भवति स्म। यथा-महाभारते कुन्ती उत्तमा राजनीतिज्ञाऽऽसीत् द्रौपद्यापि पाण्डवेभ्यः राजनैतिकज्ञानं प्रदत्तम् बाणभट्टस्य हर्षचरितेन ज्ञायते यत् शासन-सम्बन्धिकार्येषु हर्षवर्धनेन स्वभगिन्या राज्यश्रियः सहायता प्राप्ता।

मराठाराजनीतौ ताराबाई-अनुबाई-अहिल्याबाई-लक्ष्मीबाई इत्यादयः स्त्रियः बुद्धिमत्ता-कौशल-राजनीतिज्ञता-वीरतादीनां गुणानां कृते प्रसिद्धाः वर्तन्ते।

ताराबाई पूर्णसाहसेन पत्युः परं शासनं सञ्चालितवती औरंगजेबेन च सह वीरतया युद्धं कृतवती।

अनुबाई चतुर्विंशतिवर्षस्य आयुषि राजनीतिक्षेत्रम् आगता, यस्मिन् समये सर्वत्राशान्तिः एव विद्यमाना आसीत् किन्त्वतिसाफल्येन तया शासनं कृतम्, अनन्तरं 'कोल्हापुर' प्रदेशस्य स्थापना जाता।

लक्ष्मीबाई बुद्धिमती शूरवीरा च आसीत्। तया सम्यग्रूपेण सैन्यसंचालनं कृतम्। तस्याः नेतृत्त्वे एकस्याः स्त्रीसेनायाः प्रादुर्भावोऽभूवत्।

वर्तमानसमयेऽस्माकं देशे नार्यः पुनरवतीर्णाः जाताः। राजनीतौ मन्त्रिरूपेण कार्यरताः बहव्यः नार्यः देशस्य प्रगतौ विकासे संवर्धने च स्वभूमिकां निर्वाहयन्ति, न केवलं राष्ट्ररक्षणेऽपितु संस्कृतिरक्षणेऽपि। 2014 तमे वर्षे यदा लोकसभाचुनावः जातः तस्मिन् समये अनेकाः स्त्रियः संस्कृतभाषायां शपथग्रहणं कृतवत्यः आसन्। इदानीमप्युच्चपदे विद्यमानाः स्त्रियः संस्कृतरक्षणे प्रयासरताः सन्ति, तासां प्रयासेन शीघ्रमेव संस्कृतेः पुनरुत्थानं भविष्यति।

एवं भारतीयराजनीतिः वीरनारीणां कथाभिः युक्ताऽस्ति। तासां मर्यादाशील-कर्त्तव्यनिष्ठ-न्यायप्रिय-ओजस्वी-तेजस्वी-शौयपूर्णजीवनचरित्रेष्वस्माकं राष्ट्रं सर्वदैव गौरवयुक्तं भविष्यति।

**साहित्यिकक्षेत्रे**- यद्यप्युच्चशिक्षा नारीणां लक्ष्यं नापितु गृहस्थधर्मस्य संयोजनं सञ्चालनञ्च तस्याः प्रमुखकार्येष्वासीत् तथापि ज्ञानमवाप्य ताभिः कथमपि साहित्यिकक्षेत्रे प्रवृत्तिः कृता। संस्कृतगद्य-काव्य-नाटक-उपन्यासादिषु स्त्रीपात्राणां संयोजनेन विना रचना न विद्यते। काव्ये तु सर्वत्र रसस्यैव प्रधानता, रसं परित्यज्योत्तमकाव्यस्य निर्माणं न विद्यते, रसो नायक-नायिकयोः विभावानुभावसञ्चारियोगात् निष्पद्यते नायिकां विना शृङ्गारःकरुणादयः रसाः नोपपद्यन्ते।

अल्तेकरनाम्ना लेखकेन दक्षिणभारतस्यानेकासां स्त्रीणामुल्लेखः कृतः याभिः प्राकृतभाषायां रचना कृता। यासु रेवा-रोहा-माध्वी-अनुलक्ष्मी-पाहायी-बद्धवाही-शशिप्रभा-शीलभट्टारिकादयः प्रमुखाः। अष्टम्यां शताब्द्यां येषां ग्रन्थानां पुनः अरबीभाषायामनुवादो जातः, तेष्वेकस्याः महिलालेखिकायाः 'प्रसव-विज्ञान' इत्यस्योपरि लिखितं पुस्तकं वर्तते। तस्याः महिलायाः नाम अरबीभाषायां 'रुसा' इत्यासीत्।

एवमेव संस्कृतव्याकरणस्य क्षेत्रेऽपि 'पुष्पादीक्षित' इति नाम्ना महती विदुषी वर्तते। इयं राष्ट्रपतिपुरस्कारेण सम्मानिता, पाणिनिकृत 'अष्टाध्यायी' इत्यस्य पठनपाठने गाढप्रयत्नरताऽस्ति, अनया प्रयासः क्रियते यत् अष्टाध्यायाः सरलसुबोधपठनपाठनं केन विधिना सम्पन्नं स्यात्, अस्य कृतेऽनया ''अष्टाध्यायीसहजबोध'' ''शीघ्रबोधव्याकरणम्'' इत्यनयोः ग्रन्थयोः तीव्ररूपेण व्याकरणोक्तनियमानामवगमनविषये कथितं वर्तते। इयं 'माताजी' नाम्ना विख्याता, सहैव बहव्यः महिलारचना-काराः सन्ति यासु रमाचौधरी-लीलारावदयाल-वनमालाभवालकर-मिथिलेशकुमारीमिश्रा-क्षमा-

रावादयःप्रमुखतमाः, यासां नाट्यकृतयः वर्तमानसमये प्रकाशिताः जाताः। एवं स्वकृतिभिः याः स्वयोगदानं साहित्यिकक्षेत्रे प्रददति।

वैज्ञानिकक्षेत्रेऽपि महिलानां योगदानं सर्वैः ज्ञायते। अंतरिक्षे पूर्वं महिलानां संङ्ख्याऽधिका नासीत् किन्तु शनैः शनैः स्वातिश्रमेण तया तत्रापि स्ववर्चस्वं स्थापितम्। कल्पना चावला-सुनिताविलियम्सादयः महिलाः, अंतरिक्षस्थानकं प्रति गताः, इमाभिः न केवलं स्वसत्ता प्रमाणिताऽपितु भविष्यकालेऽन्यमहिलानां कृतेऽपि द्वारमुद्घाटितमंतरिक्षक्षेत्रे।

सैन्यसञ्चालने प्राचीनकालतः एव स्त्रीणां भूमिकाऽविस्मरणीया, प्राचीनसमयेऽस्त्रशस्त्रसम्बन्धि-ज्ञानेन इमाभिः युद्धे पुरुषैः सह गम्यते स्म।14 स्त्रियाः ममत्व-करुणा-दया-सहनशीलतादीनां यत् स्वरूपं दृष्टिगोचरं विद्यते ईदृशं स्वरूपं तस्याः स्वभावस्यानुकूलं, किन्तु तस्य प्रतिकूलं सैन्यसंचालनस्य कार्यं प्रंशसनीयम्।

2014 तमे वर्षे गणतन्त्रदिवसोपलक्ष्ये नारीशक्ति-प्रदर्शनं सर्वासां महिलानां कृते गौरवास्पदं, यदा पूजाठाकुरनाम्न्या महिलया अमेरिकीराष्ट्रपतेः कृते ''गार्ड ऑफ ऑनर'' इत्यस्य नेतृत्वं कृतं तदा भारतीयनारीणां सा कृते उच्चख्यातिः आसीत्। स्वयममेरिकीराष्ट्रपतिना कथितं सशक्तमहिलया सशक्तराष्ट्रस्य निर्माणं भवति। एवमत्र प्रथमवारं सेनात्रयं (वायु-जल-थल) 'ऑल वुमन कंटिजेंट' इति रूपेण भागः गृहीतः। सत्यमेवोक्तं दुर्गासप्तशत्याम्-

**या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।**
**नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। 15**

क्रीडाक्षेत्रेऽपि वर्तमानसमये साइनानेहवाल-मैरीकाम-साक्षीमलिक-पी.वी.सिन्ध्वादयः महिलाः अस्माकं देशस्य संस्कृतेश्च प्रतिनिधित्वं कुर्वन्ति। एवं नारीणां महत्तायाः विषये मनुना यत् प्रतिपादितं तत् समीचीनम्।-

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः।। 16**

इत्थं निष्कर्षरूपेण वक्तुं शक्यते यत् नारी स्तुतियोग्या, उत्तमवाणीयुक्ता, रमणीया, पूजनीया, कमनीया, चन्द्र इव आह्लादकारिणी, प्रकाशमाना, दीनतारहिता, परम्परापूर्णा, विविधगुणगणमण्डिता च वर्तते।

**''न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते'' 17**
इति सत्यम्।

वर्तमानसमये प्रशंसनीयरूपेण नार्युन्नतिपथेऽग्रसरा, अद्यतनसमाजस्य नार्युच्चक्षेत्रेऽध्ययनरताऽस्ति, विज्ञानक्षेत्रेऽनुसन्धानं रक्षाक्षेत्रे सैन्यशिक्षायाः च कार्यं करोति। अध्यापिकाप्रभृतिभिः राजकीयकर्मचारी-संसदीयक्षेत्र-व्यापारपर्यन्तं नारीणां वर्चस्वं विद्यते। सर्वेषु क्षेत्रेषु सपलतामवाप्य ताभिः साध्यते यत् प्राचीनकालस्य नारीषु ये गुणाः विद्यमानाः आसन् अद्यावधि यावत् ते गुणाः क्षीणाः न जाताः। नारीणामभ्युत्थानस्य श्रेयः पुरुषायैव दीयते, तेन प्रयासेनैवाद्यतनस्य नारी स्वच्छन्दरूपेण जीवनयापनं करोति। भारतीय-संस्कृतेरयमुद्घोषो विद्यते-

**पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः।**
**स्त्रियः श्रियो गृहस्योक्तास्तस्माद् रक्ष्या विशेषतः।। 18**

1. अमरकोषः - 2/6/2, 2. महाभाष्यं- 4/4/49, 3. अमरकोषः - 2/6/2-3, 4. रसमञ्जरी, 5. बृहदारण्यकोपनिषद् 1.4.3, 6. ऋग्वेदः 8.33.19, 7. अथर्ववेदः 11.1.17, 8. तैत्तिरीयोपनिषद् 1.11.2, 9. महाभारतं-शान्तिपर्व, अ.-144 (13), 10. तत्रैव अ.-144 (14), 11. तत्रैव अ.-144 (15), 12. तत्रैव अ.-144 (16), 13. तत्रैव अनुशासनपर्वणि 105.15, 14. हिन्दु-राज्य-शास्त्र-लेखक-अम्बिका प्रसाद वाजपेयी, पृ. 286, 15. दुर्गासप्तशती 5.32-34, 16. मनुस्मृतिः 3 56, 17. महाभारतं 12 134 6, 18. तत्रैव 5.38.19।

**शोधच्छात्रा,**
**रा.सं.सं. जयपुरम् ( राजस्थानम् )**

# मारवाड़ प्रदेशस्य संस्कृतैतिहासिक-महाकाव्यानि

❑ प्रोफेसर रामदत्त शर्मा डी. लिट्.

राजस्थानप्रदेशस्य भारतीयेतिहासे महत्वपूर्णं योगदानं वर्तते। तत्र समये-समये स्वेच्छया राजाज्ञया च विविधानि काव्यानि विद्वद्भिर्विरचितानि।

मारवाड़प्रदेशे यानि त्रीणि संस्कृतैतिहासिक काव्यानि रचितानि तानि ऐतिहासिकानि सिद्ध्यन्ति। तद्यथा-

अस्य काव्यस्य कर्त्ता महाकविर्बालकृष्ण दीक्षितः आसीत्। स च महाराजस्याजितसिंहस्याश्रितः महाकविः। महाराज अजितसिंहो जोधपुरस्य तत्कालीनः शासक आसीत्। तस्य राज्यकालः 1505-24 ई. वर्तते। अजित-चरित्र महाकाव्यमिदानीं प्रकाशितम्। अस्यैको हस्तलिखित आदर्शग्रन्थो योधपुरनेरशस्य ''पुस्तक-प्रकाश'' नामके पुस्तकालये सुरक्षितः। काव्येऽस्मिन् योधपुरनरेशाद गांगजीवाद् (1515) अजितसिंह (1707 ई.) यावन्महाराजानां विवरणं विलसति। दशसर्गात्मकेऽस्मिन् महाकाव्ये 418 श्लोका वर्तन्ते।

प्रथमे सर्गे पुष्करतीर्थस्य वर्णनं विधाय ग्रन्थनिर्माणस्य चर्चा प्रस्तुता अस्ति।

द्वितीये सर्गे राठौडवंशस्य प्रशंसनम्, राजभवनस्य नगरस्य च स्थापनम्, वाटिकावाप्यादिक-वर्णनं कवेः कवित्वं स्पष्टमुन्मीलयति। तृतीयसर्गे योधपुरस्य आदिशासकं गाङ्गजीवम् विविच्य तत्पुत्रस्य श्रीमालदेवस्य (1532-1619 ई.) वीर्यादिगुणाः सविशेषं कीर्तिताः। तुरीय-सर्गे श्री सूरसिंहात्मजस्य श्रीगजराजस्य वर्णनं विद्यते। अयं 'महाराज' इत्युपाधिकः प्रथमो नरेशे बभूव। पञ्चमे सर्गे महाराजस्य यशवन्तस्य राज्यकालः तत्कार्यकलापश्च कीर्तितौ। तदनुसारं यशवन्तसिंहो महान् वीरो धार्मिकश्च आसीत्। तस्य महिषी यादवराजसुता गर्भं दधौ। तत एव 1678 खीष्टाब्दस्य नवम्बरमासस्य 28 तारिकायां महाराजो दिवङ्गतः। षष्ठे सर्गे मुख्यतयाऽजितस्य जन्म विविच्य तस्य बाल्यकालः सम्यक् निरूपितः। सप्तमसर्गे तस्य जन्मोद्दिश्य बहुविधं दानं वर्णितम्। अष्टमसर्गे दिल्लीश्वरेण सह राठौडक्षत्रियाणां अर्थशास्त्रविषयको वार्तालापः तस्मादसंतोषः, रक्षार्थ बालकानामन्यत्र नयनम्, घोरयुद्धम् तदनन्तरं विजयप्रातिश्चेति विषयाः सुष्ठु विवेचिताः। नवमसर्गेऽजितसिंहस्य रक्षार्थं राठोडानां प्रयासा वर्णिताः सन्ति। दशमसर्गे दिल्लीपतिना सह सन्धिः, अजितसिंहस्य राज्याभिषेकश्च वर्णितौ। काव्यस्य अयं अन्तिमः श्लोकः-

**यावच्चन्द्र-दिवाकरौ गतिपरौ यावद् ह्रदो निश्चलो,**
**यावत्सागरसप्तके शिखरिणो याव (अस्पष्टम्)।**
**गङ्गायाः सरितो वहन्ति परितो यावद्धरा-मण्डलम्।**
**श्रीमद्राजशिरोमणे! तव यशस्तावत् सदा वर्धताम्।।**
**10/66।। अजितोदयम्-**

इदम् ऐतिहासिकमहाकाव्यं महाकवेर्भट्टजगजीवन-महोदयस्य कृतिः। काव्येऽस्मिन्, योधपुरनृपतीनां मुख्यतः यशवन्तसिंहस्याजितसिंहस्य च जीवनकालः प्रतिपादितः। जोधपुरनरेशस्य स्वपुस्तकागारे महाकाव्य-मिदं सुरक्षितम्। अस्य काव्यस्य 32 सर्गेषु 1669 श्लोका विद्यन्ते।

प्रथमसर्गादारभ्य तुरीयसर्गपर्यन्तं यशवन्तसिंहस्य

राज्यकालश्चर्चितः। तदनतरं तस्य महाराजस्य पेशावरनिवासः, विवाहः, पुत्रोत्पत्तिः, अन्यया महिष्या गर्भधारणं इत्यादि सम्यक् वर्णितम्। पञ्चमे सर्गे अवरंगजेबस्याज्ञया इख्त्यारखान द्वारा आक्रमितुं मारवाडप्रदेशं प्रति प्रस्थानम्। तस्य पराजयः यशवन्तसिंहस्य निधनम्, विविधै कारणैश्च मन्त्रिणा श्री केशरीसिंहेन बहादुरशाहेन सह युद्धभावं परित्यज्य सन्धिकरणं चेति वर्णितम्। षष्ठे सर्गे श्री केसरीसिंहो दिल्लीमगच्छत्, तत्र च मारवाडराज्यस्यायव्ययविवरणं न समयच्छत्, तेन दिल्लीश्वराज्ञया प्राणदण्डभागभूत्। केसरिणः प्राणहरणात् दुःखिताः क्षुब्धाश्च तत्सहाया योधपुरं प्रत्यागमन्। तदनन्तरं मुगलेभ्यः अन्तःपुरस्य शिशोरजितसिंहस्य चात्मरक्षाप्रसङ्गः प्रचलति। तदनुसारं चांदावतश्रीमोहकमसिंहस्य, जाया स्वकीयां दुग्धमुखीं प्राणप्रियां च बालिकां राजकुमारस्य परिचारिकायै दत्त्वा राजकुमारमजितसिंहं च क्रोडे निधाय दूरमभगादित्यहो राजभक्तिस्तया प्रदर्शिता। सप्तमे सर्गे 'बलुन्दा' नामके स्थानेऽजितसिंहो रक्षितः किन्तु यवनसैनिकास्तदन्वेषणपरास्तत्रागन्तुमर्हन्तीति कृत्वा स सिरोहीराज्ये नीतः। इतः परं यवनसैनिकः सह युद्धस्य वर्णनं विद्यते। अष्टमसर्गादारभ्य सप्तदशसर्गं यावज्जोधपुरादिं दुर्गमधिकर्तुं राठौडसामन्तानामनेकविधकृतः प्रयत्न सुष्ठु सविस्तरं च वर्णित। सप्तदशसर्गस्यान्तेऽजितसिंहो जोधुपरदुर्गं स्वायत्तीकरोति। ग्रन्थान्तं यावदजितसिंहस्य युद्धादिबहुलं राज्यविस्तारकं च शासनं निपुणं वर्णितम्।

## अभयोदयम्ः-

'अभयोदयम्' मारवाडप्रदेशस्य तृतीयमैतिहासिकं महाकाव्यम् अस्ति। तच्च महाकवेर्जगज्जीवनस्य कृतिः। यत्र योधपुरनरेशानां प्रमुखतः अभयसिंहस्येतिहा सम्मतं वर्णनं काव्यत्वमालम्ब्य विराजते। इदानीं यावदप्रकाशितमिदम्। अस्य दशसर्गेषु 409 श्लोकाः सन्ति। एतस्यादर्शग्रन्थस्तु अधुना न उपलभ्यते, अपितु तस्यैका प्रतिलिपिः योधपुरनरेशस्य पुस्तकालये विद्यते।

प्रथमे सर्गे योधपुरनरेशानां श्रीमात्मदेव शूरसिंह गजसिंह यशवन्तसिंहाभिधेयानां वर्णनं विधाय यशवन्तसिंहस्य यादवराजपुत्री चह्वानवंशीया चेति महिषीद्वयी वर्णिता। द्वितीयसर्गे यशवन्तसिंहस्य राज्यकालश्चर्चितः। जालौरे निवसतो महाराजस्य चौहानवंशया महिष्या गर्भादभयसिंहोऽजायत। तृतीयसर्गे शाहबहादुरेण सहाभयसिंहस्य युद्धवर्णनमस्ति। तस्य जालौरनगरगमनम् अपि वर्णितम्। तुरीयसर्गे महाराजस्य अभयसिंहस्य वीरोचितकर्माणि प्रतिपादितानि। पञ्चमे सर्गे महाराजस्य दिल्लीगमनं हस्त्यश्वादिभिस्तस्य कृतं सम्मानं चेति वर्णितम्। षष्ठे सर्गे दिल्लीनरेशाद् ''राजराजेश्वरः'' इत्युपाधेः प्राप्तिः, आमेरनरेशस्य जयसिंहस्य कन्यया सह विवाहः राज्यस्यशोभनं सञ्चालनं, वृन्दावयात्रा चेति विषयाः प्रतिपादिताः। सप्तमसर्गानुसारेणाभयसिंहो नागौरराज्यमनुजाय बरवतसिंहाय प्रादात् 'राजाधिराज' इत्युपाधिना च स विभूषितः। 1727 तमे वर्षे मुहम्मदशाहस्यामन्त्रणेनाभयसिंहो दिल्लीं प्रस्थितवानित्यत्र वर्णितम्। मेडतादुर्गे स्वानुजस्यानन्दसिंहस्याक्रमणं श्रुत्वा स मेडतामगमदिति। अष्टमे नवमे च सर्गे महानरेशस्य गढमुक्तेश्वरयात्रा वीरोचितकर्माणि च वर्णितानि। दशमे सर्गे तस्य जालौरं प्रत्यागमनं प्रपञ्चितम्।


इत्थं मारवाडप्रदेशे संस्कृतमहाकाव्यानि सम्यग् विरचितानि।

**प्लाट नं. 102, प्रथम तल, पाकेट-16**
**सेक्टर 24, रोहिणी, नई दिल्ली-110085**

# नरपतिजयचर्यास्वरोदये चन्द्रशृङ्गोन्नतिचक्रम्

❑ स्वातिः शर्मा

ज्यौतिषशास्त्रस्य त्रिषु स्कन्धेषु संहितास्कन्धः अतीव विस्तृतविषयकः वर्तते यतः सिद्धान्तफलितस्कन्धाभ्याम् भिन्नानां सर्वेषां ज्यौतिषसम्बन्धिविषयाणां समावेशः संहितास्कन्धे एव क्रियते। अस्मिन् संहितास्कन्धे स्वर-शास्त्रेण शकुनशास्त्रेण च सम्बद्धस्य आचार्यनरपतिकृतस्यः 'नरपतिजयचर्यास्वरोदयः' इति नाम्नः अनन्यग्रन्थस्य उल्लेखः प्राप्यते, यस्मिन् जीवनस्य विभिन्नपक्षैः सम्बद्धविषयाणां विवेचनमत्र ज्ञायते। 1176 तम ईशवीयवर्षे गुर्जरप्रान्ते रचितस्य अस्य ग्रन्थस्य 'चक्राध्याये' चतुरशीतिचक्रेषु चन्द्रशृङ्गोन्नतिचक्रं वर्तते, यस्य विचारः राज्यहिताय राष्ट्रोन्नतये च करणीयः।




अर्द्धचन्द्राकारे चन्दशृङ्गोन्नतिचक्रे द्वादशराशीन् उत्तरसमदक्षिणशृङ्गेषु स्थापयित्वा नक्षत्र-ग्रह-पक्ष-तिथीनामाधृत्य राज्ये सुभिक्षदुर्भिक्षयोः विचारः मुख्य-रूपेण प्रतिपाद्यते। शुक्लपक्षस्य द्वितीयातिथितः चन्द्रमसः प्रकाशः आरभ्यते, तदैव तस्य गोलस्य न्यून एवांशो दृश्यते, यत् चन्द्रशृङ्गमिति प्रसिद्धमस्ति।2 नरपतिजय-चर्यास्वरोदये विस्तारपूर्वकं द्वादशराशिषु चन्द्रमसि उदिते फलादेशः कथितः। मीनमेषराश्योः चन्द्रमस्युदिते दक्षिणशृङ्गमुन्नतं भवति यत् दुर्भिक्षकारणं वर्तते तद्रूपचन्द्रमाः लोके दारुणभयमध्यं च आनयति। वृषकुम्भराश्योः उदिते चन्द्रमसः समशृङ्गमुन्नतं भवति, यत् विग्रहकारकं मन्यते। आचार्यवराहमिहिरस्य संहिताग्रन्थे बृहत्संहितायां समशृङ्गे चन्द्रस्थिते सुभिक्षं क्षेमं वृष्टिश्च इति शुभफलं प्राप्यते।3 मिथुन-कर्क-सिंह-कन्या-तुला-वृश्चिक-धनु-मकर-कुम्भ-आसु राशिषु कविनरपतिः उत्तरशृङ्गम् उन्नतं मन्यते, यस्य फलं सुभिक्षं क्षेमं, सस्यवृद्धिः वृष्टिश्च भवति। नारदीयसंहितायां वृश्चिकधनुराश्योः चन्द्रमसः धनु-सदृशशृङ्गं भवति यत् राज्ये युद्धस्थित्याः निर्माणं करोति, किंतु यस्मिन् देशे धनोः मौर्वी तिष्ठति, तस्य राज्यस्य सेनायाः उद्योगः जयः सूचयति। कन्यातुलाराश्योः चन्द्रमसः शूल-सदृशं शृङ्गमुन्नतं भवति, यस्मात् कारणात् चौरभयम्, व्याधिः, ईतिः रोगभयादयः राज्ये वसन्ति।4 बृहत्संहितायां चन्दशृङ्गे विलीने अधोमुखे वा, दृष्टे तदा मनुष्यस्य मृत्युफलमिति प्रतिपादितमस्ति।5

राशीनां समानमेव नक्षत्राणाम् आधारेऽपि आचार्यः नरपतिः स्वग्रन्थे चन्द्रशृङ्गस्य राज्याय शुभप्रदं हानिप्रदञ्च फलं कथयति। नक्षत्राणां उत्तरदक्षिणभागयोः चन्द्रशृङ्गे स्थिते शुभाशुभफलकथनं करोति। मघा विशाखयोः मध्ये उत्तरभागे च चन्द्रशृङ्गे स्थिते राज्याय शुभंकरं मन्यते। 6 किन्तु तत्रैव विशाखानक्षत्रस्य दक्षिणभागे अनुराधानक्षत्रे च चन्द्रशृङ्गे स्थिते राज्यहितविपरीते अशुभपापफलञ्च प्राप्यते। यदा ज्येष्ठा-मूल-पूर्वाषाढ़ा-उत्तराषाढ़ा-नक्षत्राणां दक्षिणे चन्द्रमसः स्थितिः भवति, तदा इदं चन्द्रशृङ्गं, वन-सर्प-अग्निजीवीनाशकं वर्तते। आचार्य-वराहमिहिरोऽपि

1. नरपतिजयचर्यास्वरोदयः- पृ. 310, व्या.-डॉ. सत्येन्द्रमिश्रः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, प्रथम संस्करणम् 2009।
2. सचित्र ज्योतिष शिक्षा - पृ. 218, बी.एल. ठाकुरः, मोतीलाल बनारसीदासः, षष्ठ पुनःर्मुद्रण वर्ष 2015।
3. समशशिनि सुभिक्षक्षेमवृष्टयः प्रथदिवससदृशाः स्युः। दण्डवदुदिते पीडागवां नृपश्चोग्रदण्डोऽत्र।। सुत्रम् 11, चन्द्रचाराध्यायः बृहत्संहिता।
4. ईतिरोगभयं शूले.... शूलवत् तौलिककन्यायोः। - चन्द्रशृङ्गोन्नतिचक्रम्, चक्राध्यायः, नरपतिजयचर्यास्वरोदयः, पं. गणेशदत्तपाठकः, चौखम्भा संस्कृत संस्थानं वाराणसी, वि.सं. 2064
5. शृङ्गेणैकेनेन्दुर्विलीनमथवाऽप्यवाऽय्यमुखं शृङ्गम्। सम्पूर्ण चाभिनवं दृष्ट्वैको जीविताद् भ्रश्येत्।। सूत्रम् 17, चन्द्रचाराध्यायः, बृहत्संहिता।
6. विशाखामैत्रर्योर्याम्यपार्श्वगः पापकृच्छशी। मध्यमः पितृदैवत्यो द्विदैवतं शुभात्तर।। चक्राध्यायः, नरपतिजयचर्चास्वरोदयः।

ज्येष्ठादीनि नक्षत्राणि 'बीजाय' नाशकारकाणी मन्यते। 7 कादम्बिनीग्रन्थकर्त्ता पं. मधुसूदनओझा अपि चन्द्र-प्रसंगे शुभाशुभफलस्य वर्णनं करोति। कृतिका-रोहिणी-मृगशिरा-मघा-चित्रा-विशाखा-अनुराधा-ज्येष्ठा-मूल-पूर्वाषाढ़ा-उत्तराषाढ़ा-एतेषां नक्षत्राणाम् उत्तरभागे विचरन् चन्द्रमाः शुभफलकारको भवति, किंतु एतेषामेव नक्षत्राणां दक्षिणे विचरन् चन्द्रमाः दुष्टफलकारको भवति इति। अन्यनक्षत्राणां दक्षिणभागे गते चन्द्रमाः अपि शुभफलमेव ददाति।8

चन्द्रशृङ्गोन्नतिचक्रप्रकरणे चन्द्रबिम्बस्य विषयेऽपि सूक्ष्मविचारः नरपतिना क्रियते। चन्द्रमाः देहस्य संस्थानमिति कथ्यते, अनेनैव चन्द्रमसः अनेकानि रूपाणि सन्ति। आचार्यः विशालचन्द्रमसं सुभिक्षकारकं मन्यते, सूक्ष्मचन्द्रमसं दुर्भिक्षकारकम्, अधोमुखचन्द्रमसं शस्त्रभयकारकं, दण्डाकारकञ्च चन्द्रबिम्बं राज्ये कलहकारकं मन्यते। 9 बृहत्संहितायां वराहमिहिरोऽपि चन्द्रबिम्बानुसारं फलं कथयति। सः प्रतिपादयति, मध्यमचन्द्रबिम्बं वज्रसंज्ञकमस्ति यत् राज्ये क्षुधां भयदञ्च भवति, शासकेषु च उद्यमजनकं भवति। इदमेव चन्द्रबिम्बं यदि मृदङ्गसदृशं प्राप्यते, तदानीं कल्याणसुभिक्षकारकञ्च भवति। अतिविस्तृतमूर्तियुक्तः चन्द्रमाः राजलक्ष्म्याः वृद्धिं करोति। स्थूलमूर्तियुक्तः चन्द्रमाः सुभिक्षकारकः सूक्ष्ममूर्तियुक्तश्च चन्द्रमाः अपि प्रियधान्यं अर्थात् सुभिक्षकारको भवति।10

अस्मिन् चक्रे भौम-बुध-जीव-शुक्र-शनि-इति पञ्चग्रहैः पीडितैः शृङ्गस्य चन्द्रमण्डलस्य वा फलं क्रमशः आयः-अर्घ्यः-वृष्टिः-शासकनाशः-प्रजानाशः इति भवति। 11 बृहत्संहितायामपि चन्द्रशृङ्गस्य बुधग्रहेण वेधे अनावृष्टिः दुर्भिक्षञ्च फलं कथ्यते।12 कादम्बिनी-ग्रन्थेऽपि ग्रहानुसारं फलं प्राप्यते यत् शुक्लपक्षस्य द्वितीयातिथ्यां सूर्यात् वामदिशायां यदि चन्द्रोदयः भवति, तदा सम्पूर्णमासान्ते शुभफलमेव करोति। किंतु तद्विपरीते सूर्यात् दक्षिणभागतः चन्द्रोदिते अशुभकारकं दृश्यते।13

अनेनैव क्रमेण आचार्यः नरपतिः मासपक्षेऽपि चन्द्रशृङ्गफलं कथयति-शुक्लपक्षे पिप्पलिकाकारे चन्द्रमसि स्थिते क्रमात् हानिः वृद्धिः च भवति। 14 निमित्तशास्त्रसम्बद्धा एका कृतिः भद्रबाहुसंहिता अस्ति, यस्यां चन्द्रशृङ्गप्रसंगे राज्याय सुभिक्ष-दुर्भिक्षविचारः प्राप्यते। तदुनसारेण यदि शुक्लप्रतिपदातिथौ चन्द्रमसः द्वे शृङ्गे समे दृश्यते अर्थात् सममण्डलं भवति, तदानीं राज्याय निस्सन्देहमेव भयकारकं भवति यतः सस्यवृद्धिः न भवति वृष्टिः चाऽपि न भवति।15 अतएव आषाढमासस्य शुक्लप्रतिपदातिथौ चन्द्रशृङ्गस्य अवलोकनं अवश्यमेव करणीयम्।

वर्षे सुभिक्षं-दुर्भिक्षं, सस्यवृद्धिः, वृष्टिः, अर्घ्यमिति एभ्यः सर्वेभ्यः पूर्वज्ञानं चन्द्रशोङ्गोन्नतिचक्रेण सम्भवं भवति। यद्यपि चन्द्रशृङ्गस्य विषये अनेकेषु ग्रन्थेषु उल्लेखः प्राप्यते, किंतु नरपतिकविना स्वग्रन्थे नरपतिजयचर्या-स्वरोदये इदं चक्रं परिश्रमेण लिखितमस्ति येन राज्ये भवितव्याः घटनायाः शुभाशुभफलं कुथितं शक्नोति। अतः राज्यहिताय इदं चक्रम् अतीव महत्त्वपूर्णमस्ति-इति प्रतीतं भवति।

---

7. ऐन्द्रस्य शीतकरणो मूलाषाढाद्वयस्य चायातः। याम्येन बीजजलचरकाननहा वह्निभयदश्च।। सूत्रम् 5, नपतिजयचर्यास्वरोदयः।
8. कृत्तिकारोहणी सौम्या मघाचित्राभ्या उत्तरे। विशाखादि भषट्काच्च चरन्निन्दुः शुभावहः।। एतेषा दक्षिणे मार्गे चरन् दुष्टफलः शशी। अन्येषां दक्षिणे मार्गे चरन्नपि न दोषकृत्।।- चन्द्रादेशाधिकरणम्, कादम्बिनी।
9. सुभिक्षकृद्विशालेन्दुरविशालोर्थनाशनः। अधोमुखः शस्त्रभयं कलहो दण्डसन्निभे।। चक्राध्यायः, नरपतिजयचर्यास्वरोदयः।
10. मध्यतनुर्वज्राख्यः क्षुद्भयदः सम्भ्रमाय राज्ञां च। चन्द्रो मृदङ्गरूपः क्षेमसुभिक्षावहो भवति।। ज्ञेयो विशालमूर्तिर्नरपतिलक्ष्मीविवृद्धये चन्द्रः। स्थूलः सुभिक्षकारी प्रियधान्यकरस्तु तनुभूर्त्तिः।। चन्द्रचाराध्यायः, बृहत्संहिता।
11. कुजाद्यैर्निहते शृङ्गे मण्डले वा यथाक्रमात्। आयार्घवृष्टिनृपतिमजनानां नाशकृच्छशी।।- चक्राध्यायः, नरपतिजयचर्यास्वरोदयः।
12. शस्त्रक्षुद्भयकृद्यमेन शशिजेनावृष्टिदुर्भिक्षकृत्।- सूत्रम्-21, चन्द्रचाराध्यायः बृहत्संहिता।
13. यदि शुक्लद्वितीयायां वामे चन्द्रोदय रवेः। शुभ तदाखिले मासि न शुभ दक्षिणोदये। - चन्द्रादेशाधिकरणम्, कादम्बिनी।
14. शुक्ले पिपीलिकाकारें हानिर्वृद्धिर्यथार्थकृत्। सुभिक्षकृद्विशालेन्दुरविशालोर्थ-नाशनः।- चक्राध्यायः, नरपतिजयचर्यास्वरोदयः।
15. शुक्लप्रतिपदि चन्द्रे समं भवति मण्डलम्। भयंकरं तदा तस्य नृपस्याथ न संशयः।। सूत्रम् 132
समाभ्यां यदि शृङ्गाभ्यां यदा दृश्यते चन्द्रमाः। धान्यं भवेत् तदा न्यूनं मन्दवृष्टिं विर्निर्दिशेत्।।- सूत्रम्-133 - चतुर्दशोऽध्यायः, भद्रबाहुसंहिता।

शोधच्छात्रा-संस्कृविभागः
राजस्थानविश्वविद्यालयः, जयपुरम्

# भाग्यरेखया संपत्ति-विचारः

❑ शम्भूसिंह बारेठः

भाग्यरेखा हस्तस्य रेखासु एका मुख्या रेखा वर्तते तथा च हस्तरेखाध्ययने रेखेयं विशिष्टं स्थानं भजते।

हस्ते भाग्यरेखया संपत्तिविचारोऽपि क्रियते। मणिबन्धस्य उपरिष्टादारभ्य मध्यमायाः अंङ्गुल्याः मूल-पर्यन्तं प्राप्ता रेखा ''भाग्य रेखा'' इति कथ्यते। हस्तसंजीवने कथितम्-

**मणिबन्धादूर्ध्वरेखा यात्यङ्गुष्ठादिसम्मुखी।**
**असौ पञ्च विधा राजाश्रयणी राज्यसौख्यदा।।1**

कररेखालक्षणं शास्त्रेऽपि कथितम्-

**मणिबन्धात् प्रकटा प्राप्ता चरमाङ्गुलिं तु या रेखा।**
**सा करोति यशः समृद्धिं श्रेष्ठिनं वा विभवसंयुक्तम्।।2**
**मणिबन्धात् प्रकटा सम्प्राप्ता अनामिकाङ्गुलिरेखा।**
**सा करोति सार्थवाहं नरपतिशतपूजितं पुरूषम्।।3**

अर्थात मणिबन्धात् आरब्धा कनिष्ठिकाअंङ्गुल्या अनामिकाया वा पर्यन्तगामिनी रेखा भाग्यरेखा कथ्यते। अनया रेखया यशसो वैभवस्य समृद्धेश्च विचारः क्रियते।

प्राच्यैः सामुद्रिकशास्त्रिभिरियं रेखा ऊर्ध्वरेखा, धनरेखा, विभव रेखा, प्रारब्ध रेखा, मध्य रेखा, इन्दिरा रेखा नदरेखा राज्यप्रदायिनी रेखा चेत्यादिभिः विविधनामभिः सम्बोध्यते। पाश्चात्यविद्वद्भिः रेखा इयं Fate line इति नाम्ना कथ्यते।

भाग्यरेखा जीवनरेखातः आरब्धा स्याच्चेत् तर्हि जातकः स्वकीयकृतप्रयत्नैः योग्यतया कठिनपरिश्रमेण च जीवने साफल्यं लभते। ईदृशस्य जातकस्य प्रारंभिकं जीवनं काठिन्यपूर्णं भवति तथा च तस्य समीपस्य वातावरणं परिस्थितयश्च तत्प्रतिकूलाः भवन्ति। भाग्यरेखा जीवन-रेखातः निर्गत्य सुस्पष्टा बलवती च भूत्वा अग्रे वर्द्धमाना स्यात्तर्हि जातकः तासां कठिनपरिस्थितीनामुपरि विजयं प्राप्य स्वकीयपरिश्रमेण योग्यतया च साफल्यं प्राप्नोति तथा च भाग्ये विश्वासं विधाय तूष्णीं न तिष्ठति।

संबंधेऽस्मिन् सर्वाधिकं महत्त्वपूर्णमिदमस्ति यत् यस्मिन् समये भाग्यरेखा जीवनरेखातः पृथक् स्यात् तस्य समयस्य अनुमानं भाग्यरेखया कर्त्तुं शक्यते तथा च सः समय स एव भवति यदा जातकः स्वसंबंधिजनानां बन्धनात् मुक्तो भूत्वा स्वतंत्रजीवनं प्रारभते।

यदि भाग्यरेखा मणिबन्धदेशात् गंभीररूपा भवति तदा मनुजः धनाढ्यः सम्पत्तिशाली सुखी च भवति। यदि भाग्यरेखा चंद्रग्रहक्षेत्रं आक्रम्य विशुद्धरूपा मन्दालयं याति तदा जनः मध्यमधनवान् तथा लावण्ययुक्तां ललनामुपैति। पितृरेखया समुत्थिता भाग्यरेखा गम्भीररूपा विशदा च भवति तदा नरः निजकुटुम्बतः सुखं प्राप्नोति ।4

विशदभाग्यरेखा यदा गुरोः स्थानं गच्छति तदा नरः नीतिपरः सर्वाधिकारसम्पन्नः प्रभुतासम्पन्नश्च भवति। भाग्यरेखा प्रारंभे वक्रा तथा अन्ते सरला भवति तदा नरः प्रारंभे तु महादरिद्री तथा वृद्धावस्थायां धनी भवति।

यदि नरस्य भाग्यरेखा विशदा न भवति अर्थात खण्डिता तथा अश्रेयस्करा भवति तदा नरः दरिद्रस्तथा बलवीर्य हीनो भवति। कररेखालक्षणशास्त्रे चतुर्णां वर्णानां पृथक् फलदात्री रेखा भणिता यथा-

**विप्राणां वेदकरी राज्यकरी क्षत्रियाणां सा भणिता।**
**वैश्यानां अर्थकरी सौख्यकरी शूद्रलोकानाम्।।5**
**अखण्डा अस्फोटिता अपल्लवा आयता अच्छिन्ना च।**
**एकापि ऊर्ध्वरेखा सहस्त्रजनपोषिणी भणिता।।6**

यदा भाग्यरेखा मणिबन्धादारब्धा भवति करतलस्य मध्यभागात् शनिक्षेत्रञ्च प्राप्नोति तदैव सूर्यरेखा सुस्पष्टा स्याच्चेत्तर्हि जातकस्य जीवनं प्रतिभया सौभाग्येन साफल्येन च परिपूर्णं भवति।

भाग्यरेखा चेच्चन्द्रक्षेत्रादारब्धा स्यात्तर्हि जातकस्य भाग्यं घटनापूर्णं परिवर्तनशीलञ्च भवति तथा च परेषां गतिविधिष्ववलंबितं भवति।

चन्द्रक्षेत्रादारब्धा भाग्यरेखा हृदयरेखया सह मेलनं करोति चेत्तर्हि योगोऽयं सूचकोऽस्ति यत् जातकः अखण्ड-

सौभाग्यं अतिसुखदं वैवाहिकं जीवनञ्च प्राप्स्यति यदि मणिबन्धादारब्धा भाग्यरेखा सरला स्यात् तथा च चन्द्र-क्षेत्रादागत्य रेखैका तया सह मेलनं कुर्यात्तर्हि तस्य तात्पर्यमिदं भवति यत् जातकस्य भाग्यवृद्धिः कस्यापि विपरीत लिङ्गव्यक्तेः साहाय्येन जाता वर्तते।

करतलस्य मध्यभागतः भाग्यरेखा आरब्धा भवति चेत्तर्हि ईदृशस्य जातकस्य प्रारंभिकं जीवनं काठिन्यपूर्णं भवति तथा च सः लक्ष्यप्राप्त्यर्थं कठिनं संघर्षं विदधाति। परं मंगलक्षेत्रात् भाग्यरेखा आरब्धा स्यात् तस्याश्च शाखैका सूर्यक्षेत्रं प्रति गच्छेत्तर्हि जातकः विना साहाय्येन स्वकीयं भाग्यं निर्माति तथा च स्वकीयपुरुषार्थेन परिश्रमेण योग्यतया च धनं, प्रतिष्ठां साफल्यञ्च प्राप्नोति।

भाग्यरेखा मस्तिष्करेखातः आरब्धा स्याच्चेत्तर्हि जातकस्य भाग्योदयः विलम्बेन भवति तथा च सः स्वकीय-मस्तिष्कसाहाय्येन एव साफल्यं प्राप्नोति।

भाग्यरेखया जातकस्य जीवनवृत्तौ घटितानां मुख्यानां घटनानां ज्ञानं प्राप्यते। जन्मकालेऽपि रेखेयं हस्ते भवितुमर्हति तथा च स्पष्टीकर्तुं शक्नोति यत् जातकस्य भाग्ये भविष्यकाले किं किं घटितं भविष्यति। केषुचित् हस्तेषु रेखेयं धूमिला अस्पष्टा च भवति। स्पष्टेयं रेखा तस्याञ्च भावि जीवनमार्गस्य भाविघटनानां संकेताः सुष्ठुरूपेण अङ्किताः भवन्ति।

पं. राजेशदीक्षितस्यानुसारेण यदि नदरेखा (भाग्यरेखा) गंभीरा अखण्डा तथा श्रेष्ठस्थित्यां भवति सा महानदी रेखा कथ्यते। रेखेयं राज्योपभोगं धनं सर्वविधैश्वर्यतां प्रयच्छति।7

यदि नदरेखा सूक्ष्मा अखण्डा श्रेष्ठस्थित्यामस्ति तदा रेखेयं महाराज्यप्रदात्री कथ्यते। रेखयानया जातकः अतुलनीयं वैभवं सर्वविधां संम्पत्तिं च प्राप्नोति।

हस्ते यदा कदा एकाधिका भाग्यरेखा भवति। एवंविधा भाग्यरेखा यदा उत्तमहस्ते तदा अमृतरूपिणी मन्यते। एवंविधजनाः भाग्यशालिनः भवन्ति। एताः रेखाः हस्तस्य अन्यरेखायाः दोषान् दूरीकुर्वन्ति। एकाधिका भाग्यरेखाः यदि जातकस्य भवन्ति तदा विरोधिनोऽपि अस्य सहायतां कुर्वन्ति।

डॉ. गोपेशकुमारानुसारेण यस्मिन् स्थाने भाग्यरेखा गंभीरा भवति तस्या जीवनस्यावस्थायां जातकस्य धनागमः प्रचुररूपेण भवति तथा च यस्मिन् स्थाने भाग्यरेखा सूक्ष्मा भवति तस्यां जीवनावस्थायां जातकस्य धानगमनस्य न्यूनता भवति।8

डॉ. भोजराज द्विवेदिनः अनुसारेण भाग्यरेखा जीवनरेखया सह शुक्रग्रहम् आवृणोति तदा जातकः व्यापारमेव करोति। परन्तु रेखेयं चन्द्रक्षेत्रं गच्छति तदा जातकः राजकीयसेवकः भवति। यदा अस्याः शाखा द्वयोः स्थानयोः गच्छति तदा जातकः व्यापारं राजकीयसेवाञ्च द्वावेव करोति।9

भाग्येरखातः ऊर्ध्वगामिन्यः सूक्ष्माः रेखाः शुभफल-दायिकाः भवन्ति तथा च भाग्यरेखायै बलप्रदानं कुर्वन्ति। एवंविधरेखा धनलाभस्य सूचिकाऽपि भवति।

एवं भाग्यरेखयाः सूक्ष्मपरिशीलनेन विमर्शेन च व्यक्तेः सम्पत्तिविचारः कर्तुं शक्यते।

**सन्दर्भ ग्रन्थाः**


1. हस्तसंजीवनं रेखाविमर्शनाधिकारः पञ्चमोध्यायः श्लोकः 8 संस्करणं 2012
2. कररेखा लक्षणशास्त्रं श्लोकः 20 संस्करणं 2009
3. कररेखा लक्षणशास्त्रं श्लोकः 19 संस्करणं 2009
4. अभिनवसामुद्रविज्ञानं – कररेखा लक्षणशास्त्रं संस्करणं 2007
5. अभिनवसामुद्रविज्ञानं – कररेखा लक्षणशास्त्रं संस्करणं 2007
6. कररेखा लक्षणशास्त्रं श्लोक 18 संस्करणं 2009
7. कररेखा लक्षणशास्त्रं श्लोक 17 संस्करणं 2009
8. वृहद् विशाल सामुद्रिक विज्ञानं – पं. राजेश दीक्षितः पृष्ठः 374
9. हस्तरेखा विज्ञानं, डा. गोपेश कुमार ओझा, पृष्ठ 232 संस्करणं 2007


**शोधच्छात्रः**

**राजस्थान विश्वविद्यालयः, जयपुरम्**

# गोवंशस्य वैशिष्ट्यम्

❑ डा. सुनीता शर्मा ( प्रथम )

अद्य स्थूल पर्यावरणस्य एवं सूक्ष्ममानव-संवेदनायाः संरक्षणाय तथा विकासाय गोपालवृत्तिः अत्यन्तम् आवश्यकी अस्ति। गोपालवृत्तेः अनुसरणेन गोवंशस्य वृद्धिः बलीवर्दस्य ऊर्जायाः उपलब्धिर्भविष्यति, गोमलमूत्रेण च भूमिः उर्वरा भविष्यति, गोदुग्ध घृत दधि-तक्रेण सर्वे निरामया भविष्यन्ति। गोशाला केन्द्रित ग्रामोद्योगाः सर्वेषां वृत्तिं दास्यन्ति। भारतीय-कृषेः दृढाधारप्रदानार्थं, विकृत- पर्यावरणस्य सन्तुलनार्थम् तथा मानवीय-संवदेनानां जागरणाय केवलं गोसेवा आधारिता जीवनपद्धतिरेव शक्या। प्राचीना भारतीयाः ऋषयः गोधार्मिकतया परिचिता एव नाऽऽसन् अपितु अस्याः संरक्षण संवर्धनस्य तेषां परिष्कृत विज्ञानभावना आसीत्।

दृश्यमाने समस्ते विश्वे अद्यत्वे कोऽपि विकल्पः न विकसितः य आहारस्वरूपे अमृततुल्यः सर्वेषां गुणैः परिपूर्णः गोदुग्धतुल्यो भवेत्। गोमहत्त्वं विज्ञानस्य अर्थशास्त्रस्य दृष्ट्या सहस्त्रवर्षपूर्वमेव अवलोकितम्। तदा एव अस्माकम् भारतीयानि शास्त्राणि गो-प्रशंसायां परिपूर्णानि। महर्षि सुश्रुतस्य शब्देषु गोदुग्धं पवित्रं स्नायुवर्धकञ्च, शक्ति, ओज, शुक्राणु वर्धकञ्च।

दुग्धस्य महत्त्वं स्नेहस्य न भूत्वा खनिजलवणानाम् उपयुक्तायाः श्रेष्ठतायाः आधारेण अस्ति। वैज्ञानिकानां मते गो दुग्धे निम्नांकिता खनिजाः प्राप्यन्ते।

**गोदुग्धे1**

| | | | |
|---|---|---|---|
| खनिज/लवण | प्रकाराः मात्रा च | एमनो एसिडः | 21 प्रकारकाणि |
| फैटो एसिडः | 11 प्रकारकाणि | विटामिनः | 06 प्रकारकाणि |
| कित्वः | 08 प्रकारकाणि | धातुज तत्त्वाः | 25 प्रकारकाणि |
| शर्करा | 02 प्रकारकाणि | फास्फोरस यौगिका | 04 प्रकारकाणि |
| नाईट्रोजन तत्त्वानि | 19 प्रकारकाणि | | |

गो दुग्धे प्राप्ताः मुख्य एन्जाइमाः पेरेक्सेडजाः, रिडकटैजाः लाइपेजाः प्रोटिऐजाः, गेदालेजादयः।

खनिज-कैल्शियम, लोहा, फास्फोरस, ताम्रः, आयोडीन, सिलीफोन, गोदुग्धे विटामिन ए-1, कैटोरिन, डी-ई, टोकोपेराल, विटामिन बी-2, रिवोफ्लेविन, बी-3, बी-4 तथा विटामिन-सी रूपेण प्राप्यन्ते। गोदुग्धस्य वैशिष्ट्यं इदमप्यस्ति यत् अस्मिन् विद्यमानं सेरिब्रासाइस् मस्तिष्काय तथा स्मरणशक्तेः विकासाय स्ट्रानटान अणुविकारान् प्रतिरोधयति। अनेन सर एम.डी.जी. आई. प्रोटीनस्य कारणेन रक्तकोशिकासु कैंसरस्य प्रवेशः न भवति। प्रसिद्धेन जीवविज्ञानवेत्रा डा. एस.ए. पीमल्स स्वकीय दीर्घकालिक शोध प्रयोगेण तथा परीक्षणेन प्राप्तम् यत् गोदुग्धः मनुष्यस्य कृते पौष्टिकः पूर्ण आधारः अस्ति।

भारते प्रतिजने दुग्ध मात्रा या उपलब्धता 200 ग्रामाः तर्हि-

न्यूजीलैण्ड-01 किलो 700 ग्रामाः, आस्ट्रेलिया-01 किलो 400 ग्रामः, नार्वे-01 किलो 350 ग्रामः, डेनमार्क-01 किलो 250 ग्रामः, ब्रिटेन-01 किलो 250 ग्रामः, भारते प्रतिजनस्य दुग्धस्य व्ययः 08 औंसाः, ब्रिटेने 40 औंसाः, अमेरिकायां 43 औंसाः, डेनमार्के 45 औंसा, न्यूजीलैण्डे 56 औंसाः, स्वीडने 60 औंसाः अस्ति।

**गोमूत्रः**- चिकित्सा दृष्टया गोमूत्रम् औषधीयगुणा-नाम् महत्त्वपूर्णं स्रोतमस्ति। प्रतिरोधकक्षमतायाः वृद्धिं कृत्वा रोगाणां विनाशाय शक्तिं ददाति। गोमूत्रेण हृदयरोगो दूरीभवति, लघुशंका उन्मुक्ता भवति, गोमूत्रसेवनेन धमनीषु रक्त प्रभावः स्वाभाविकः भवति तथा जीर्ण गुर्दारोगस्य, किडनी विनाशस्य उत्तमा औषधिः तथा स्वस्थ जनस्य अन्त्राणां विकार प्रशमनाय आयुर्वेदस्य चरकसुश्रुतादि आचार्याः गोमूत्रं दिव्यौषधिं अमन्यन्त।

भारतीयाः वैद्याः गोमूत्रस्य प्रयोगं विभिन्नासु औषधीषु कुर्वन्ति, गोमूत्रे ''बेक्ट्रियोफाज'' नामकं जीवन-शक्ति-प्रतिपादकं जीवाणु प्राप्यते। गोमूत्रस्य प्रयोगः निम्नलिखित-रोगेषु भवति।

कुष्ठरोगे, त्वचारोगे, दमाशमने, नेत्ररोगे, कण्डूयने, हर्नियारोगे, दन्तरोगे, मिर्गीरोगे, सन्धिवातादिरोगे।

गोमूत्रे विविधाः क्षाराः विद्यमानाः येन अनेकेषु रोगेषु लाभदायकाः पोटेशियम कैल्शियम, मैग्नेशियम, क्लोराइड, यूरिया फास्फेट, अमोनिया, क्रियटिन आदिषु, अस्य अतिरिक्तं गोमूत्रे अनेकेषाम् तत्त्वानां एकः विशिष्टः प्रवाहः भवति ते निम्नांकिताः सन्ति। नाइट्रोजन, गन्धक, अमोनिया, कापर, यूरिक एसिड, फास्फेट, सोडियम, पौटेशियम, मैंगजीन, कार्बोलिक, कैल्शियम, विटामिन ए.बी.सी.डी.इ. हिप्यूरिक एसिड, क्रियाटिनिन, स्वर्गछारादयः।

गौमूत्रः हानिप्रद बैक्टीरिया वर्गाय हानिकारकः अस्ति।

**गोमयस्य औषधिमयताः**

गोमूत्रस्येव गोमयस्य अपि स्वं वैज्ञानिकं वैशिष्ट्यं अस्ति। इदं मलरोधकं, दुर्गन्धनाशकं, शोषकं, पोषणतुल्य गुणानां संघातः अस्ति। अस्मात् कारणात् भारतीय परम्परायां यज्ञस्य वेदिकां पूजास्थलं आवासगृहान् सर्वप्रकार प्रदूषण मुक्तान् कर्तुं सहस्त्रैः वर्षैः गोमयस्य लेपनं क्रियते। गोमयस्य वैशिष्ट्यम् इदमस्ति यत् आणविक विकिरणस्य रक्षार्थं एकं सुरक्षा कवचमस्ति। गोः गोमयलेपकरणेन आणविक विकिरणस्य प्रभावः अपेक्षाकृतं न्यूनो भवति। एतत् जापाने नागासाक्यां तथा हीरोशिमायां आणविक त्रासदी पश्चात् अत्रत्यैः वैज्ञानिकैः अनुसन्धानबलेन सिद्धं कृतम्। उक्त वैज्ञानिक तथ्यैः सिद्धं भवति यत् भारतीय ऋषयः गोधार्मिकस्वरूपेण परिचिता न अपितु अस्य संरक्षणे संवर्धने तेषां परिष्कृता विज्ञान-भावना आसीत्। अस्मात् कारणात् प्राचीन भारतीय वैदिक ग्रन्था गोगरिमया महिमया च मंडिताः सन्ति यतोहि यदि वयं किमपि कार्यं धर्मेण मानितं कुर्मः तदा कार्यकरणं सरलं भवति यतोहि भारतः धर्मप्रधान देशः अस्ति। धर्मे गोहिंसायाः निषेधोस्ति यतोहि गवि 33 कोटि देवतानां निवासः गोपृष्ठे ब्रह्मा, ग्रीवायां विष्णुः मुखे रूद्रादि देवतानां निवासः कथ्यते। गोः रक्षा पूजा सर्वेषां देवानां आराधना अस्ति।

**सर्वे देवाः स्थिता गेहे सर्व देवमयी हि गौः पृष्ठे ब्रह्मा,**
**गले विष्णुः मुखे रुद्रः प्रतिष्ठितः।**

अनेन प्रकारेण गौः समस्त तीर्थांणां तीर्थः कथ्यते।

**त्वं माता सर्वदेवानां, त्वं च यज्ञस्य कारणम्।**
**त्वं तीर्थ सर्वतीर्थानां, नमस्तेऽस्तु सदानघे।।**

अस्माकम् प्राचीनाः भारतीया मनीषिणः गोः वैज्ञानिकतया परिचिता आसन्। सम्पूर्ण गोवंशः मानवस्य अस्तित्त्व, रक्षण, पोषण, विकास, संवर्धनाय स्थापितः। भारतीय संस्कृतौ गोः माता कथ्यते। एतत् अतिरिक्तं समस्त प्राणिनां मातृ रूपेण महाभारते सम्बोधिता गौः।

**गावः श्रेष्ठा पवित्राश्च पावना जगदुत्तमाः**
**ऋते दधि घृताभ्यां च नेह यज्ञः प्रवर्तते**
**गावो लक्ष्मयाः सदा मूले गोषु पाप्मा न विद्यते**
**मातरः सर्वभूतानां गावः सर्वसुखप्रदाः।।4**

गोमले 15 प्रकारकाणि खनिज तत्त्वानि-नाइट्रोजन 5, फास्फोरस, पोटेशियम, लौहतत्त्वम्, जस्ता, मैगनीज, ताम्रतत्त्वम्, बोरोन्, मोलीण्डनम् बोरोक्स, कोबाल्ट, सल्फेट, चूना, सोडियम। अस्माकम् ऋषीणां दूरदृष्टेः परिचायकं अथर्ववेदस्य मन्त्रमिमम् पठत।

**माता रुद्राणां दुहिता वसूनां।**
**स्वसादित्यानाममृतस्य नाभिः।। 6**

अस्मिन् मन्त्रे गौ रूद्राणां माता वसूनां दुहिता आदित्यानां स्वसा अमृतस्य नाभिः अनया संज्ञया विभूषिता कृता। एतत् सर्वं स्थानम् गोवंशस्य वैज्ञानिकताया हेतोः एव प्राप्तम् यतोहि गोदुग्धं समस्त मानवजातेः जीवन रसायनं वरदानम् अस्ति। गोमूत्रं चिकित्सा-विज्ञानस्य दृष्टया औषधीय-गुणानां श्रोतमस्ति, गोमयं आणविक विकिरणेन सुरक्षायाः कवचमस्ति। गोपालनं जैविककृषेः अद्यतनाय महती आवश्यकता अस्ति। भगवान श्रीकृष्णः सर्वेषां ज्येष्ठः गोपालकः आसीत्। कृषकाः पशुपालका गोरक्षकाश्च किन्तु आधुनिकताया एवं वैदेशिक अनुकृत्तेः कारणात् कृषका गोपालनं त्यक्तवा अद्यत्वे नानाविधि रोगैः ग्रसिताः कृषेः विमुखा भवन्ति। अद्य आवश्यकता अस्ति गोमूत्रेण निर्मितानां खादानां, देशी कीटनाशकेन कृषकः विषेले कीटनाशकेभ्यः मुक्तिं लभते।

कतिपय वर्ष पूर्वम् अर्थशास्त्र विकास सम्बन्धिन्या संस्थया (दिल्याः) एकस्मिन् सर्वेक्षणे कृषि कार्ये 08 कोटि वृषभाः प्रयुक्ता लब्धाः। यदि ते न भविष्यन्ति, यथा गोवंशस्य विनाशः जायमानः अस्ति, तर्हि तत् स्थाने 02 कोटि ट्रेक्टराः आवश्यका, येषांमूल्यम् 40 खरबाः भविष्यन्ति। तेषां सञ्चालने 640 अरब रूप्यकाणां वैदेशिकडीजलस्य आवश्यकता भविष्यति।

अनेन प्रकारेण गोवंशेन एवं अन्यैः पशुभिः देशाय 40 सहस्त्र मेगावाट ऊर्जायाः प्राप्तिः विभिन्न प्रकारैः भवति, यस्य वार्षिक मूल्यम् 27 सहस्त्रकोटि रूप्यकाणि, इत्थं एतस्य उपयोगिनः गोवंशस्य तीव्रतया विनाशः नाशकारी भविष्यति।

स्वतन्त्रतायाः समये 83 कोटि पशवः आसन् अद्य दश कोटिः अवशिष्टा एषा व्यवस्था भवेत् तर्हि 2020 ईस्वी समये देशः पशुविहीनः भविष्यति।

अतः आवश्यकं गोपालनं, गोरक्षणं, संवर्धनं, धार्मिक, आध्यात्मिक, सामाजिक, प्राकृतिक, नैतिक, लौकिक एवं

पारलौकिक दृष्ट्याआवश्यकता तत् पुनः स्थापितं कर्तुम्। गोवंशः अस्माकम् संस्कृति सभ्यतयै, प्रसन्नतायाः समृद्धेश्च प्रतीकमस्ति।

वेदग्रन्थेभ्यः अद्यपर्यन्तं ऋषिमुनि-कथने गोमहिमा उपयोगिता उल्लिखिता यत् अद्यपर्यन्तं विज्ञानस्य निकषायां वास्तविकमस्ति।

**सन्दर्भ संकेतः**

1. क) शर्मा :- आचार्यः श्रीरामः (पंचगव्य चिकित्सा) ख) गोरायते :- प्रो. रोनाल्डः (पशुविज्ञान विशेषज्ञः, कारनेल विश्वविद्यालयः) 2. गोरायते :- प्रो. रोनाल्डः (पशुविज्ञान विशेषज्ञः, कारनेल विश्वविद्यालयः) 3. क) शर्मा :- आचार्यः श्रीरामः (पंचगव्य चिकित्सा) ख) गोरायते :- प्रो. रोनाल्डः (पशुविज्ञान विशेषज्ञः, कारनेल विश्वविद्यालयः) 4. महाभारत 5. गोरायते :- प्रो. रोनाल्डः (पशुविज्ञान विशेषज्ञः, कारनेल विश्वविद्यालयः) 6. अथर्ववेदः

**संस्कृतविभागः, राजस्थानविश्वविद्यालयः, जयपुरम्**

# दत्तन्न राष्ट्राय किम्

❑ **डॉ. रामनारायण झा**

**स्थापत्यं स्थितिगं धनुर्विधिरयश्चायुर्विधिर्वेदतः,**
**पुत्री पुत्रविधानमैहिकसुखं मातुः पितुः पूजना।**
**ईशावास्यमिदं जगच्छुभतरं जीवोऽथ मायालयौ**
**सर्गो वर्णयुतश्च वाश्रमनयः दत्तन्नराष्ट्राय किम्।। 16।।**

**यज्ज्ञानं कविना सनातनतमं चाप्तोक्तवाच्यात्मकं**
**सत्यं तच्च नुतं सुगीतमृषिभिर्व्यासेन व्यस्तं ततम्।**
**श्रीमन्मान्यवरैर्महद्भिखनसा चाविष्कृतं चाज्ञया**
**भूम्नां साम्प्रतमादिकाव्यमुदितमाम्नायशब्दाभिधम्।। 17।।**

**यद् यद् दृष्टिपटं प्रयाति सकलं मायामयं माधुरं**
**संसाराकृतिमत्क्रिया कृतिमतां या या प्रिया चाप्रिया।**
**यो यो वा विषयो ननु ह्यविषयो वाच्यो ह्यवाच्यो धियाऽ-**
**चिन्त्यो चिन्त्यतमो महच्च विततं वेदाद्धि संसिध्यति।। 18।।**

**जीवेस्त्वं शरदःशतं श्रुतिमतं मित्रस्य वा चक्षुषा,**
**पश्येमाथ नु विन्दतेऽमृतरसञ्चोक्तं श्रुतौ विद्यया।**
**वीर्यम्वा करवावहै सह समैः ब्रह्मास्म्यहं संवद-**
**ध्वं मे देहि ददामि तेऽनघवचो दत्तन्न राष्ट्राय किम्।।1 9।।**

**यस्मिन्वा विचिकित्सतीति मनुजः प्रेतेऽथ देवोऽपि**
**श्चात्मा कुत्र नु याति ह्याशु विजहत्कायं विप्रश्नोऽथवा।**
**वित्तेनैव कदा नु तृप्यति नरश्चैकेन ज्ञातेन यत्**
**विज्ञातं निखिलं धनं नहि न मा मा मा गृधः कस्यचित्।।20।।**

**एकं सद् बहुधा वदन्ति बहुशो विप्रा ऋचां घोषणा**
**तत्त्वं वासि महावचोऽपि बहवो गायन्ति नित्यं मुदा।**
**अक्षैर्मा ननु दीव्य चेति तमसो मां पाहि रे ज्योतिषा**
**तत्त्वं सूर्य! अपावृणु त्वमनिशं दत्तन्न राष्ट्राय किम्।। 21।।**

**मैत्रेयी निजवल्लभं श्रुतिसमज्ञानाब्धिग्राहाग्रगं,**
**पृच्छन्ती कतिशो निजान्मनसिजब्रह्मात्मतत्त्वानुगान्।**
**प्रश्ना नैकविद्यानमीभिरमृताज्ज्ञातुं त्वया शक्यते,**
**नारी ब्रह्मविदां वरेषु महती विद्यावती कीदृशी।। 22।।**

**पन्था नान्य इति प्रमाणपटवो मन्त्राः समुच्चं जगुः,**
**श्रेयस्कामयुजां सतामनुदिनं निश्श्रेयसप्राप्तये।**
**कोऽहं चेति कुतस्सुताऽथ वनिता माता पिता कौ तव,**
**तत्त्वं चिन्तय सर्वदा मनुज रे! दत्तन्न राष्ट्राय किम्।। 23।।**

**गार्गी ब्रह्मविदां वरस्य बृहती पत्नी प्रिया संवदा,**
**ज्ञातुं संसदि याज्ञवल्क्यमनुगा प्रश्नान् समापृच्छत।**
**या सा वा जनकस्य गौरवगतिर्ब्रह्मात्मविद्याचरी,**
**घोषैका ऋषिकाधिवेदमुदितं दत्तन्न राष्ट्राय किम्।। 24।।**

**मा हिंस्यादिति संगदन्ति कतिधा प्रोच्चं श्रुतीनां गिरः,**
**आत्मा वा नर! रे! सदा शृणु सखे द्रष्टव्य आहोस्वित**
**श्रोतव्यो निखिलैर्हृदा न्वहरहो मन्तव्य एष ध्रुवा,**
**ध्यातव्यो बहुकृत्व एष मनसा दत्तन्न राष्ट्राय किम्।। 25।।**

390, रजनीविहार, हीरापुरा,
अजमेर रोड़, जयपुरम् (राज.)

नारी-स्तम्भः

# विदुषी विद्यावती

❑ डॉ. राजेश्वरीभट्ट

बालकस्य चरित्रनिर्माणे मातृपितृगुरुणां महद् योगदानं भवति। एषु त्रिष्वपि मातुर्भूमिका महत्तमा अस्ति।

कथितञ्च -

उपाध्यायान् दशाचार्यः आचार्याणां शतं पिता।
सहस्त्रं तु पितॄन् माता गौरवेणातिरच्यते।।
मनुस्मृति2। 145

अदर्शजननी सन्ततेः प्रथमगुरुरूपेण लालन-पालन ताडनादिभिः संस्कारैः बालकस्य परिष्कारं करोति। बालकं प्रति मातुर्भूमिका घटं प्रति कुम्भकारस्य भूमिकेव महत्त्वपूर्णा दृश्यते। लोके यावन्तो महापुरुषा अभवन् प्रायः तेषां निर्मात्री विदुषी जनन्येवाऽस्ति। अस्मिन् प्रसंगे अधिगत-परमार्थस्य, अधीतसकलशास्त्रस्य, धर्मबुद्धेः संतशिरोमणेः तैलंगधरस्वामिनो जीवननिर्मात्री संस्कारवती जननी विद्यावती अत्रोल्लेखनीया वर्तते। दक्षिण भारते विद्वत्कुले जाता विद्यापारंगता विद्यावती।विजयग्रामवासिनः श्रुतकीर्तेः भूस्वामिनः पण्डितप्रवरस्य नृसिंहधरस्य पत्नी आसीत्। परिवारेऽस्मिन् श्रीसरस्वत्योः महती कृपाऽऽसीत्। समानगुणशीलसम्पन्नौ दम्पती सौजन्यस्य प्रत्यक्ष-मूर्तिरिव आस्ताम्। धर्मपरायणा विद्यावती भगवतः शंकरस्य परमोपासिका आसीत्। नित्यं शिवाराधनं विना तस्यै जलग्रहणमपि नारोचत। शिवस्याराध-नायां स्तुतिपरकमन्त्राणाम् उच्चारणं कुर्वती विद्यावती सरस्वतीव अदृश्यत। धामिककृत्येषु संलग्नाऽपि स्वाध्याये प्रवृत्ताऽपि विद्यावती कुशल-गृहस्वामिन्या। भूमिकानिर्वहणे सर्वथा सावहिता आसीत्। कालान्तरे पुत्रजन्मनः पश्चाद् विद्यावत्या दायित्वं दृढतरं जातम्। सम्प्रति पुत्रस्य तैलंगधरस्य अभ्युदयो विकासश्च विद्यावत्या विशिष्टं कर्तव्य-मासीत्। सम्प्रति पुत्रतैलंगस्य लालनपालनादिषु कार्येषु विद्यावती सर्वथा संलग्ना जाता। यथाकालं पुत्रे विशिष्टगुणा-नामाधानं, मातुः सकाशाद् धार्मिकसंस्काराणां नैतिकमूल्यानामादानञ्च भवेदिति जनन्या लक्ष्य-मासीत्। एतत्कृते माता विद्यावती सदुपदेशैः सदा पुत्रस्य मनोबलं वर्द्धयन्ती तं भगवद्भक्तिं प्रति प्रेरितवती। पुत्रस्य कल्याण-कामिनी माता विद्यावती तस्य व्यक्तित्वविकासाय तेन सह सन्मित्रस्य भूमिकां निरवहत्। मातुः सद्वचनैः आत्मनः सद्गुणैश्च कालेन तैलंगस्वामिनो धार्मिकवृत्तिः प्रबलतरा जाता। अध्ययनाध्यापनं, भगवद्भजनं, मातृसेवा च तैलंगस्वामिनो दिनचर्या आसीत्। 1661 तमे वर्षे गुरुस्वरूपाया मातुर्विद्यावत्याः स्वर्लोकगमनानन्तरं 52 वर्षीयः तैलंगस्वामी आत्मनो जन्मभूमिं विजयनगरं विहाय शिवस्य शरणं प्राप्तुं विश्वनाथनगरी वाराणस्या-मगच्छत्। तत्रैव भगवद्भजने व्यापृतो विद्यावत्याः सच्छिष्यः तैलंगस्वामी दीर्घायुष्यं प्राप्य पार्थिवं देहमत्यजत्।

## हिन्दी अनुवाद

बालक के चरित्रनिर्माण में माता, पिता एवं गुरुजनों का महान योगदान होता है। इन तीनों में भी माता की भूमिका सर्वाधिक महत्वपूर्ण होती है मनुस्मृति के अनुसार बालकों के विकास में उपाध्याय से आचार्य का दशगुना अधिक, आचार्य से सौ गुना अधिक पिता का एवं पिता से हजार गुणा अधिक योगदान माता का होता है, अतः अपने अतिशय गौरव के कारण माता का स्थान अधिक महत्वपूर्ण है आदर्श जननी सन्तान की प्रथम गुरु के रूप में लालन-पालन ताड़न आदि संस्कारों से बालक का परिष्कार करती है। बालक के जीवन निर्माण में माता

की भूमिका कुम्भकार के समान महत्त्वपूर्ण होती है। संसार में जितने भी महापुरुष हुए हैं प्रायः उनके जीवन निर्माण की पृष्ठभूमि में उनकी माँ का ही अधिक योगदान हैं। इस प्रसंग में परमार्थ में प्रवृत्त सकलशास्त्रों के ज्ञाता, धर्मबुद्धि, संत शिरोमणि तैलंगधर स्वामी के जीवन की निर्मात्री संस्कारवती माता विद्यावती विशेषरूप से उल्लेखनीय है। दक्षिण भारत के विद्वान् परिवार में उत्पन्न हुए विदुषी विद्यावती विजयग्रामवासी प्रसिद्ध जमींदार पण्डित प्रवर नृसिंहधर जी की पत्नी थीं। इस परिवार पर लक्ष्मी सरस्वती की महती कृपा थी। समान गुण एवं स्वभाव वाले पति पत्नी सरलता की साक्षात् मूर्ति के समान प्रतीत होते थे। विद्या एवं वैभव से सम्पन्न होने पर भी दोनों पति पत्नी के अभिमान छू भी नहीं गया था। धर्मपरायणा विद्यावती भगवान शंकर की दृढोपासिका थी। प्रतिदिन शिव की आराधना के बिना विद्यावती जल भी ग्रहण नहीं करती थी। शिव की आराधना में स्तुति परक मन्त्रों का उच्चारण करती हुए विद्यावती साक्षात् सरस्वती की प्रतिमूर्ति प्रतीत होती थी। धार्मिक कार्यो में संलग्न होने पर भी, स्वाध्याय में प्रवृत्त रहने पर भी विद्यावती कुशलगृंह स्वामिनी की भूमिका का निर्वहण करने में सर्वथा आगे रहती थी। कालान्तर में पुत्र जन्म के पश्चात् विद्यावती का दायित्व अधिक बढ गया। अब पुत्र तैलंग के लालन-पालन, अध्यापनादि कार्यो में विद्यावती पूर्णतः संलग्न रहती थी यथासमय पुत्र को विशिष्टगुणों का प्रशिक्षण धार्मिक संस्कार एवं सन्मूल्यों की शिक्षा के प्रति प्रेरित करना विद्यावती का लक्ष्य रहता था। इसके लिए माता विद्यावती सद्वचनों से सदैव पुत्र का मनोबल उन्नत करती थी तथा भगवत भक्ति के प्रति पुत्र को प्रेरित करती रहती थीं। पुत्र के व्यक्तित्व विकास के लिये विदुषी माता तैलंगस्वामी के सन्मित्र की भूमिका का निर्वाह करती थीं। माता के सदुपदेश से तथा अपने सद्गुणों से तैलंगस्वामी की धार्मिक वृत्ति क्रमश प्रबल होती गई। अध्ययन, अध्यापन भगवद्भजन एवं माता की सेवा तैलंगस्वामी की दिनचर्या बन गई। सन् 1661 में गुरुस्वरूपा माता विद्यावती के निधन के पश्चात् 52 वर्ष की आयु में तैलंग स्वामी ने अपनी धन्यभूमि विजयनगर को छोड़कर भगवानशिव की शरण प्राप्त करने के लिए विश्वनाथ की नगरी वाराणसी की ओर प्रस्थान किया। वाराणसी में शिव के आराधन में संलग्न विद्यावती के सत् शिष्य तैलंगस्वामी ने दीर्घायु प्राप्त की एवं वही पर अपनी पार्थिव देह को त्याग दिया।

**-सी-276, भाभामार्ग, तिलकनगर, जयपुर**

**प्रेरकप्रसङ्गशतकम्**

# द्विपञ्चाशत्तमः - पशुपक्षिणां संगीतप्रीतिः

**❑ श्रीमती आराधना धर्माधिकारी**

नागानां संगीतप्रीतिस्तु विख्यातैव, अन्येऽपि पशुपक्षिणः संगीतध्वनिना आकृष्टा भवन्ति। श्रीकृष्णस्य वंशीवादनं श्रुत्वा गावो वत्साश्च प्रधाव्य तत्रैकत्रिताभवन्ति स्म। एवमेव वृक्षगुल्मादीनामपि संगीतप्रीतिर्वैज्ञानिकैः प्रमाणिता। घटनेयमकबरकालीनास्ति। संगीतसम्राट तानसेनः बाल्ये यदा बेहटवने संगीताभ्यासं करोतिस्म तदा तस्य संगीतं श्रोतुं वन्यपशवः खगाश्चापि एकत्रिता भवन्तिस्म। एकदा पातसाहो अकबरस्ततो गजमेकं श्वेतवर्णं समानीय स्वगजालये बन्दीकृतवान्। तस्याभिलाषासीत्तमारोढुम्। परं न कश्चिद् गजचालकः तं वशीकर्तुं प्राभवत्। तदा सम्राट् एतद्दायित्वमपि तानसेनाय दत्तवान्। तानसेनः स्वसंगीतमाध्यमेनैव तं वशीकृत्य तस्मै समर्पितवान्। सम्राट् च तमारुह्यैव स्वशोभायात्रायां गतः। तदा प्रभृति च स एव गजः तस्य शोभायात्रायाः भूषण-मभूत्।

**218, धर्माधिकारिभवनम् ब्रह्मपुरी, जयपुर**

आयुर्वेद-स्तम्भः

# वर्षासु शमयेद्वायुम्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**आयुर्वेदे हि ऋतूणामत्यधिकं महत्त्वं निर्दिष्टम्। यतो हि संवत्सरात्मा भगवानादित्यः गतिविशेषेण कालस्य विभागं करोति। सामान्यतयाऽहोरात्रपक्ष-मासर्त्वयनसंवत्सरादिरूपेण कालस्य स्थूल-प्रविभागो वर्तते। तत्र पञ्चदशाहोरात्राणि पक्षः, पक्षद्वयेन च मासस्यैकस्य निर्वृत्तिर्भवति। एकस्मिन् संवत्सरे द्वादश मासाः भवन्ति, द्विमासिकमृतु कृत्वा षड्तवो भवन्ति, ते शिशिर वसन्त ग्रीष्मवर्षाशरद्धे-मन्तात्मकाः भवन्ति। केचित् त्रीन् चतुरो वा ऋतून् शीतोष्णवृष्टिभेदेन गणयन्ति, किन्त्वायुर्वेदे तु षड्तव एव स्वीकृताः। आयुर्वेद वातपित्तकफात्मकानां दोषत्रयाणां परिकल्पना वर्तते। तेषां सञ्चयप्रकोप-प्रशमाश्चापि ऋृत्वनुसारिणो भवन्ति। रोगाणा-मुत्पत्तिरपि ऋत्वनुसारिणी भवति।**

आयुर्वेद में ऋतुओं का अत्यधिक महत्त्व निर्दिष्ट है। क्योंकि संवत्सर स्वरूप वाले भगवान् सूर्य गतिविशेष के द्वारा काल का विशेष रूप से विभाग करते हैं। सामान्यतया अहोरात्र, पक्ष, मास, ऋतु, अयन एवं संवत्सर आदि रूप से काल का स्थूल विभाग है। इसमें पञ्चदश अहोरात्र एक पक्ष है, दो पक्ष से एक मास होता है। एक संवत्सर में 12 महीने होते हैं, दो माह की एक ऋतु हो कर छः ऋतुएँ होती हैं। वे शिशिर, वसन्त, ग्रीष्म, वर्षा, शरद और हेमन्त ये होती हैं।ुछ लोग तीन या चार ऋतुओं को शीत, उष्ण और वर्षा के भेद से गिनते हैं, किन्तु आयुर्वेद में तो छः ऋतुएं ही स्वीकार की गई हैं। आयुर्वेद में वात, पित्त, कफस्वरूपक तीन दोषों की कल्पना है। उन दोषों के सञ्चय, प्रकोप और प्रशम भी ऋतुओं के अनुसार ही होते हैं। रोगों की उत्पत्ति भी ऋतुओं के अनुसार होती है।

**कालप्रभवाद्धेमन्ते श्लेष्मणः सञ्चयो भवति, सः श्लेष्मा वसन्ते प्रकुपितो भूत्वा श्लैष्मिकान् रोगाञ्ज-नयति, एवमेव निदाघे सूर्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्याल्लघुत्वाच्च वायोः सञ्चयो भवति, स सञ्चितः वायुः वर्षासु कालस्य प्रभावाद् वातिकान् व्याधीञ्जनयति। वर्षासु च सञ्चितं पित्तं शरदि कुप्यत्यत एव तत्र पैत्तिकान् व्याधीञ्जनयति तत् प्रकुपितं पित्तम्। वर्षासु प्रकुपितस्य वायोः शमनमधिकृत्यात्र किञ्चित् प्रस्तूयते। यतोहि वर्षाकालस्तु वायोः प्रकोपकालो वर्तते। अस्य प्रशमनेन वातव्याधयः वर्षासु जनं न पीडयन्ति। वर्षासु सामान्यतया रूक्षशीतलघुसूक्ष्मखर गुणात्मकानां द्रव्याणां सेवनं न कर्तव्यम्। तत्र हि स्वाद्वम्ललवणदक्षात्मकानां द्रव्याणां सेवनमुचित-मात्रायां कर्तव्यम्। पानभोजनसंस्कारान् प्रायः क्षौद्रान्वितान् भजेत्।**

काल के प्रभाव से हेमन्त में श्लेष्मा का सञ्चय होता है। वह श्लेष्मा वसन्त में प्रकुपित होकर श्लेष्म सम्बन्धी रोगों को उत्पन्न करता है। इसी तरह से ग्रीष्म में सूर्य के तीव्र ताप से उपशोषित शरीर वाले शरीरधारियों के रूक्षता से और लघुता से वायु का सञ्चय होता है, वह सञ्चित वायु

वर्षा में काल के प्रभाव से वातसम्बन्धी व्याधियों को उत्पन्न करता है। वर्षा में सञ्चित पित्त शरद ऋतु में कुपित होता है अतः वह प्रकुपित उस शरद् ऋतु में पित्तज व्याधियों को उत्पन्न करता है। वर्षा में प्रकुपित वायु के शमन की ध्यान में रखकर यहाँ कुछ प्रस्तुत किया जा रहा है। क्योंकि वर्षाकाल तो वायु का प्रकोपकाल है। इसके प्रशमन से वर्षा में व्यक्ति को वातव्याधियाँ पीडित नहीं करती हैं। सामान्यतया वर्षा में रूक्ष, शीत, लघु, सूक्ष्म, खर गुण वाले द्रव्यों का सेवन नहीं करना चाहिए। इसमें मधुर, अम्ल, लवण रस वाले द्रव्यों का सेवन उचित मात्रा में करना चाहिए। पेय पदार्थों और भोजन के संस्कार प्रायः शहद से युक्त होने चाहिए।

**वर्षासु मधुप्रयोगः विशेषेण हितकारी वर्तते। अस्मिनृतावुदमन्थं दिवास्वप्नमवश्यायं नदीजलञ्च वर्जयेत्। जलसेवने तु सर्वथाऽवधानताऽऽवश्यकी, सर्वदा शुद्धमेव जलं पिबेत्, माहेन्द्रस्य तप्तशीतस्य च जलस्य सेवनमुचितम्। पर्युषितं भोजनं कदापि न करणीयम्। तत्र ह्युष्णं स्निग्धं मात्रावत् जीर्णे वीर्याविरुद्धं भोजनं कर्तव्यम्। शीतमुष्णीकृतं भोजनमपि न करणीयम्। विशेषेण हि सिद्धशीतानां शाकादिव्यञ्जनानामुष्णीकरणं न विधेयम्। खण्डीकृतानां किञ्चित्कालपर्यन्तं निधापितानां फलानां भक्षणं रोगकारकं भवति, विशेषेण हि विष्टम्भिस्वरूपाणि तानि खण्डीकृतानि फलानि छर्द्यतीसारोदरशूलकामलादीनामुत्पत्तिं कुर्वन्ति। आपणे व्यावसायिकरूपेण समुपलब्धानां फल-रसानामिक्षुरसस्य च सेवनं न कर्तव्यम्। शरीरशुद्धिः स्थानशुद्धिश्च विशेषेण करणीया वर्तते। क्लेदयुक्ते स्थाने वासश्च न कर्तव्यः।**

वर्षा मे शहद का प्रयोग विशेष रूप से हितकारी होता है। इस ऋतु में अधिक जलवाला मन्थ ( सत्तू का घोल ), दिन में सोना, रात को ओस में सोना और नदी का जल वर्जित है। जल से सेवन में तो सर्वथा सावधानी आवश्यक है, हमेशा शुद्धजल ही पीना चाहिए। आकाशीय जल तथा अच्छी तरह गर्म कर के ठण्डा किए गए जल का सेवन उचित है। बासी भोजन बिल्कुल भी नहीं करना चाहिए। इस ऋतु में उष्ण, स्निग्ध, मात्रापूर्वक तथा पहले का भोजन पच जाने पर एवं परस्पर वीर्य में अविरुद्ध भोजन करना चाहिए। ठण्डा भोजन गर्म किया हुआ हो तो उसे नहीं करना चाहिए। विशेष से उन शाकादि व्यञ्जनों को गर्म नहीं करना चाहिए जो बनाने (तैयार करने) के बाद ठण्डे हो गए हो। टुकडे करके (काटकर के) कुछ समय तक रखे हुए फलों का खाना (सेवन करना) रोगकारक होता है। विशेष विष्टम्भ करने वाले (पेट को फुलाने वाले) काटे हुए वे फल वमन, अतीसार, पेटदर्द, कामला (पीलिया) आदि रोगों को उत्पन्न करते हैं। बाजार में व्यावसायिकरूप से प्राप्त होने वाले फलरसों का और गन्ने के रस का सेवन नहीं करना चाहिए। शरीर शुद्धि और स्थान की शुद्धि विशेष रूप से करनी चाहिए। क्लेदयुक्त (नमी वाले) स्थान में ठहरना और निवास नहीं करना चाहिए।

**वर्षाकाले सेवनीयानां केषाञ्चिद् रोगानामु-ल्लेखोऽत्र क्रियते-**

**1. पिप्पल्यः, रक्तचन्दनं, मुस्तं, कटुरोहिणी, द्राक्षामलक बिल्वानि समया मात्रया गृहीत्वा यवकुटरूपेण कुट्टनं कृत्वा क्वाथरूपे सञ्जातस्यास्य योगस्य विंशति ग्रामपरिमितायां मात्रायां ग्रहणं कृत्वा**

**400 मि.लि. परिमिते जले समुत्क्वा वस्त्रपूतस्य चतुर्थांशावशिष्टस्य सेवनमेककाले प्रातः सायं वा कर्तव्यम्। अनेन वर्षाकासजनितस्य ज्वरस्वय शमनं भवत्यथवा तस्योत्पत्तिरेव न भवति।**

**2. बलां, बिल्वानि, नागरं, धान्यकं, शतयुष्यां, जीरकं पिप्पली, पिप्पलीमूलं, चित्रकं, यवानी-त्र्चैतेषां द्रव्याणां पृथक्-पृथक् रूपेण, द्वयोः द्रव्ययोः त्रयाणां वा द्रव्याणां सम्मेलनं कृत्वा चूर्णं विधेयम्। चूर्णस्यास्य ग्रामद्वयपरिमितस्य प्रयोग उष्णोदकेन करणीयः। अनेन वर्षाकालजनितस्य मन्दाग्नेः निवारणं भवति।**

वर्षाकाल में सेवन करने योग्य कुछ योगों का यहाँ उल्लेख किया जा रहा है-

1. पीपल, लाल चन्दन, नागरमोथा, कुटकी, द्राक्षा, आँवला और बिल्व की गिरी (गूदा सूखा) समान मात्रा में लेकर जौकुट के रूप में कूटकर क्वाथरूप में तैयार इस योग को 30 ग्राम की मात्रा में लेकर 400 मि.लि. जल मे उबाल कर कपडे से छने से छने हुए चतुर्थांशावशिष्ट इसका सेवन एक समय में या प्रातः सायं (दो बार) करना चाहिए। इससे वर्षाकाल से उत्पन्न ज्वर का शमन होता है अथवा (पहले ही ले लेने के कारण) उसकी उत्पत्ति नहीं होती।

2. खरेंटी, बिल्व, सोंठ, धनिया, सौंफ, जीरा, पीपल, पीपलामूल, चित्रक, और अजवायन इन द्रव्यों का पृथक्-पृथक् रूप से या दो अथवा तीन द्रव्यों को मिलाकर चूर्ण कर लेना चाहिए। इस चूर्ण का दो ग्राम की मात्रा में प्रयोग गर्म पानी से करना चाहिए। इससे वर्षाकाल के कारण उत्पन्न मन्दाग्नि का निवारण होता है।

**3. एकं पञ्चसारं पेयमस्ति। पञ्चसारेऽस्मिन् पिप्पल्यः 250 मि.ग्रा. परिमिता एव देयाः। शृतं पयस्त शीतीकृत्य तस्मिन् मधु 15 ग्राम परिमितं सर्पिस्तु 5 ग्रा. अथवा परिमितमेव देयम्। पिप्पल्यस्तु पयसि पूर्वमेव क्षिप्त्वा पश्चाद् दुग्धं शृतं कर्तव्यम्। शर्करा तु रुच्यनुसारिण्येव भवेत्। एतत्पेयं प्रसिद्धं वर्तते। अस्य प्रयोगः विषमज्वरेऽथवा वर्षाकाले समुत्पन्ने कस्मिंश्चिदपि ज्वरे कर्तव्यः। सुश्रुते प्रोक्तमेतत् पेयमत्रोल्लेखनीयं वर्तते। यथा-**

**शृतं पयः शर्करा च पिप्पल्यो मधुसर्पिषी।**
**पञ्चसारमिदं पेयं मथितं विषमज्वरे।।**
**क्षतक्षीणे क्षये श्वासे हृद्रोगे चैतदिष्यते।**

**(सु.उ.चि. 2/254-255)**

**अन्यः पञ्चसाराख्यो मन्थोऽपि विद्यते, तत्र तु मधुखर्जूरमृद्वीकापरूषकसिताश्च लाजसक्तुषु संयुक्ताः भवन्ति, स तु ग्रीष्मे प्रयोज्यः वर्तते।**

3. एक पञ्चसार पेय है। एक पञ्चसार में पीपल 250 मि.ग्रा. (दो रसी) ही डालनी चाहिए। उबाले हुए दूध में ठण्डा कर के उसमें शहद 15 ग्राम और घी तो पाँच ग्राम या 10 ग्राम ही डालना चाहिए। पीपल तो पहले ही दूध में डालकर बाद में दूध उबालना चाहिए। शक्कर तो रुचि के अनुसार ही डालनी चाहिए। यह पेय पञ्चसार नाम से प्रसिद्ध है। इसका प्रयोग विषमज्वर में अथवा वर्षाकाल में उत्पन्न किसी भी ज्वर में करना चाहिए। सुश्रुत में कहा गया यह पेय यहाँ उल्लेखीनय है। यथा-

उबाला हुआ दूध और शर्करा, पीपल, शहद तथा घी मथा हुआ यह पञ्चसार नामक पेय विषमज्वर में,

क्षतक्षीण में, क्षय में, श्वास में तथा हृद्रोग में इष्ट (इच्छित, अनुकूल) माना जाता है।

**4. वर्षासु यदा-कदा ग्रामद्वयपरिमितस्य बाल-बिल्वस्य ग्रामद्वयपरिमितस्य तथैतन्मात्रस्यैव तिलकल्कस्य प्रयोगः दध्ना कर्तव्यः। दिनत्रयपर्यन्तं तु निरन्तरं प्रातःकाले करणीय एषः प्रयोगः प्रातःकाले मध्याह्न एव समुचितः। रात्रावपि यदि प्रयोग-स्यावश्यकता भवेत् तदा तूष्णोदकेनास्य ग्रहणं समुचितम्।**

**5. पानभोजनसंस्कारे वृक्षाम्लस्य दाडिमाम्लस्य च प्रयोगः समुचितः।**

**6. यदि कदाचिदामातीसारस्योत्पत्तिर्भवेत्तदा तु धान्यकं, नागरं, मुक्तं, बालकं, बिल्वञ्च सम्मिलितायां पञ्चविंशतिग्रामपरिमितायां मात्रायां गृहीत्वा क्वाथो विधेयः। अस्य प्रयोगः प्रातःकाले सायंकाले च करणीयः।**

**7. पिप्पलीं नागरं तु एकैकग्रामपरिमितं गृहीत्वा द्राक्षायाः धान्यकस्य च ग्रामद्वयपरिमितं पृथक्-पृथक् गृहीत्वा क्वाथो विधेयः, शीतीकृतेऽस्मिन् क्वाथे 10 ग्रामपरिमितं मधु सम्मिश्र्य पातव्यः। अनेन वर्षाजनितरोगाणामुत्पत्तिरेव न भवति, अग्नेः विवर्धनं च भवति। स्वस्थे केनचिदपि रोगेण ग्रस्ते जनेऽस्य प्रयोगःसुखद एव भवति। वर्षासु सम्भूते ज्वरे प्रतिश्यायेऽतीसार उत्क्लेशे च लाभप्रद एषः प्रयोग आमपाचकोऽपि भवति। उदरशूलनिवार-कोऽप्येषः।**

4. वर्षा में यदा-कदा दो ग्राम कच्चे बेल की गिरी (गूदे) का दो ग्राम की मात्रा वाले का तथा इतनी ही मात्रावाले तिलकल्क का प्रयोग दही से करना चाहिए। तीन दिन तक निरन्तर प्रातःकाल में करने योग्य यह प्रयोग प्रातःकाल या मध्याह्न में ही उचित है। रात में भी यदि इसके प्रयोग की आवश्यकता हो तब तो इसे गर्म पानी से लेना उचित रहता है।

5. पेय पदार्थो के तथा भोजन के संस्कार में वृक्षाम्ल (विषांविल, इसके फल नारंगी के समान होते हैं तथा यह विशेषरूप से गोवा में उत्पन्न होता है, इसके स्थान पर उँसरिया या नारंगी भी ली जा सकती है) और खट्टे अनार का प्रयोग उपयुक्त रहता है।

6. यदि कभी आमातीसार की उत्पत्ति हो जाय तब तो धनिया, सोंठ, नागरमोथा, सुगन्धवाला और बिल्व की गिरी (गूदा कच्चे बिल्व का) सम्मिलितरूप से 25 ग्राम (प्रत्येक 5 ग्रा.) की मात्रा में लेकर क्वाथ बनाना चाहिए। इसका प्रयोग प्रातःकाल और सायंकाल करना चाहिए।

7. पिप्प्ली और सोंठ को तो एक-एक ग्राम की मात्रा में लेकर मुनक्का और धनिया को पृथक्-पृथक् रूप से दो-दो ग्राम की मात्रा में लेकर क्वाथ बनाना चाहिए, ठण्डे किए गए इस क्वाथ में दश ग्राम शहद मिलाकर पीना चाहिए। इससे वर्षाजनित रोगों की उत्पत्ति ही नहीं होती है और अग्नि की वृद्धि होती है। स्वस्थ में और किसी भी रोग से ग्रस्त व्यक्ति में इसका प्रयोग सुखद ही होता है। वर्षा में उत्पन्न ज्वर में, जुकाम में, अतीसार में और उत्क्लेश (जी मिचलाना) में लाभप्रद यह प्रयोग आमपाचक भी होता है। यह उदरशूल को दूर करने वाला भी है।

**80, सेनापति हाउस के पीछे, प्रेमनगरम्,**
**झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... $ 60
**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,